षधीरिति सर्वौषधीः ओषधयः सम्मिति यवान् काण्डात्काण्डादिति दूर्वाः अश्वत्थेव इति पञ्च
पल्लवान् स्योना पृथिवीति पञ्चमृदः याः फलिनीरिति फलम् सहिरत्नानीति पञ्च रत्नानि राम: ३०
हिरण्यरूप इति हिरण्यम् युवा सुवासा इति वस्त्रादिना वेष्टयेत् पूर्णा दर्वीति धान्यपूर्णपा

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

त दक्षिणयोर्द्दक्षिणबाहो सूर्याय तद्दक्षिणयोर्द्दक्षिणबाहावेव सत्याय तद्दक्षिणे सार्द्धदक्षिणकुक्षौ भृशाय तद्द
क्षिणाग्नेयपदार्द्धदक्षिणप्रबाहोऽन्तरिक्षाकाशाय तत्पश्चिमार्द्धदक्षिणप्रबाहावेव वायवे तत्पश्चिमसार्द्धदक्षिण
मणिबन्धे पूष्णे तत्पश्चिमयोर्द्दक्षिणजानौ गन्धर्वाय तत्पश्चिमसार्द्धपदे दक्षिणजङ्घायां भृङ्गराजाय ।
तत्पश्चिमे नैरृत्यपदार्द्धदक्षिणस्फिचि दौवारिकाय । तदुत्तरयोर्वामजङ्घायां सुग्रीवाय । तदुत्तरयोर्वाम
जानौ पुष्पदन्ताय । तदुत्तरयोर्वामपार्श्वे असुराय । तदुत्तरसार्द्धपदे वामपार्श्वे शेषाय तदुत्तरे वायव्यार्द्धवा
ममणिबन्धे पापाय । तत्प्रागर्द्धवामप्रबाहौ रोगाय । तत्प्राक्सार्द्धवामप्रबाहावेवाहये । तत्प्राग्द्वये वामकू
र्परे मुख्याय । तत्प्राग्द्वये वामबाहौ भल्लाटाय । तत्प्राग्द्वये वामबाहावेव सोमाय । तत्प्राग्द्वये वामांसे सर्प्पाय ।
तत्प्राक्सार्द्धवामश्रोत्रे अदित्यै । तत्प्रागर्द्धवामनेत्रे दित्यै । ततस्तु उत्तरे वास्तोष्पत इति वास्तोष्पतिं ततो म
ण्डलाद्बहिरीशानादिषु चरक्यै विदार्यै पूतनायै पापराक्षस्यै । ततः पूर्वादिषु स्कन्दाय । अर्य्यम्णे जृम्भका
य । पिलिपिच्छाय । पुनः पूर्वादिषु इन्द्रादीन् ततो मण्डलादीशाने कलशं संस्थाप्य । तत्र वरुणं नत्वा
यामीत्यावाहयेत् यथा मेरुगिरेः शृङ्गे देवानामालयस्सदा तथा ब्रह्मादिदेवानां मम गेहे स्थिरी
भवेति प्रार्थयेदिति ततोऽत्र उद्वर्त्तनादि समित्तिलान्तैः स्वतन्त्रस्थरीत्या लेऽष्टाविंशतिरष्टौ वा प्रत्येकं तत्तन्ना
ममन्त्रैर्हुत्वा वास्तोष्पत इति चतुर्भिश्च हुत्वा ॐ वास्तोष्पतये नम इति मन्त्रेण पञ्च बिल्वफलानि हु
त्वा स्विष्टकृदादिहोमशेषं समाप्य कुर्यात् ततो मण्डलदेवताभ्यः पायसबलिं दत्वा हुतशेषं पाज इति सू
क्तादिना मण्डपं त्रिःसूत्रेणावेष्ट्य सित्वा वास्तुकलशोदकेन यजमानमभिषिच्य पुनः संपूज्य यथाश

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां॰म॰
२९

पुर्वलकारास्सरेदितिमंत्रेणनिरत्ताय अग्निभ्योप्यथसर्पेभ्योयेचान्येतान्समाश्रिताः तेभ्योवलिंमयाच्छामिपुराण
मोदनमुत्तमम् नैर्ऋत्याधिपतिश्चैवनैर्ऋत्यायेचराक्षसाः वलिंतेभ्यः प्रयच्छामिसर्वंगृह्णन्तुमन्त्रितम्
ॐनमोवायुरक्षेभ्योयेचान्येतान्समाश्रिताः वलिंतेभ्यः प्रयच्छामिपुराणमोदनमुत्तमम् रुद्रेभ्यश्चैवसर्व
भ्योयेचान्येतान्समाश्रिताः वलिंतेभ्यः प्रयच्छामिप्रगृह्णन्तुसतोत्सुकाः इतिमन्त्रेणशंकुपार्श्वेषुयथा
क्रमंप्रतिमन्त्रमाषभक्तवलीन्दत्वा शांतिर्यशोवतीकान्तिर्विशालाप्राणवाहिनी सतीसुभद्रानन्दाच
इतिनवप्रागायतरेखादेवताः पूजयित्वा हिरण्याः सुप्रभाः लक्ष्मीर्विभूतिर्विमलाः प्रियाः जयावालाः
विशोका इतिनवदक्षिणोत्तरायतरेखादेवताश्चसंपूज्य मध्येव्यस्तसमस्तव्याहृतिभिर्वास्तुपुरुषमावा
ह्य वास्तोष्पते इतिसंपूज्यवलीन्दत्वा पदचतुष्टयेवास्तोर्हृदयेब्रह्माणमावाह्यपूजयित्वा ॐब्रह्मणे
नमोवलिंसमर्पयामीतिपायसादिवलिंदद्यात ततः पूर्वपदद्वयेदक्षिणस्तने अर्यम्णेनमः दक्षि
णपदद्वयेजठरदक्षिणभागेविवस्वतेनमः पश्चिमपदद्वयेजठरवामभागेमित्रायनमः वामस्तनेपृ
थ्वीधरायनमः इन्दुरुक्पदद्वयेआग्नेयकोणेस्तत्रद्विधाकृतब्रह्मपदसंलग्नपदान्तरार्द्धदक्षिणहस्तेसा
वित्राय॰ वायव्यपददक्षिणार्द्धवामहस्तेराजयक्ष्मणे॰ उत्तरार्द्धेरुद्राय॰ ईशानपदार्द्धेउरसिआपः
दक्षिणार्द्धेमुखेआपवत्साय॰ ततोन्यपंक्तिगतईशानपददक्षिणार्द्धेशिरसिशिखिने॰ तद्दक्षि य॰
णनेत्रेपर्जन्याय॰ तद्दक्षिणपदयोर्दक्षिणश्रोत्रेजयन्ताय॰ तद्दक्षिणपदयोर्दक्षिणांसेकुलिशायुधा

राम॰
२९

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

चतुर्म्मुखो ब्रह्मा स्वर्गलोके पितामहः तथास्मिन्मम यज्ञे त्वं ब्रह्मा भव द्विजोत्तम अस्य यागस्य निष्पत्तौ भ
वन्तोभ्यर्थिता मया सुप्रसन्नाः प्रकुर्वन्तु शान्तिकं विधिपूर्वकम् कोटिहोमे तु गुरुप्रार्थना त्वम्मे यज्ञे पि
ता माता त्वं गतिस्त्वं परायणम् त्वत्प्रसादेन विप्रर्षे सर्वम्मे स्यान्मनोगतम् आपद्विमोक्षाय च मे कुरु
यज्ञमनुत्तमम् कोटिहोमाख्यमतुलं शान्त्यर्थं सार्वकामिकमिति ततस्सर्वानाचार्य्यादीन्स्वशाखी
यानामृत्विक्छाखीयानाञ्च पदार्थानामनुसमयेन मधुपर्केण सम्पूज्य पुष्पमाल्याम्बरानुलेप
नैः सपत्नीकस्त्वृत्विक्सहितो भद्रकस्त्रीभिःतिवर्द्धघोषेण मण्डपम्प्रदक्षिणीकृत्य पश्चिमद्वारेण प्र
विशेत् ततश्चाचार्य्यः यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्
त्र गच्छतु अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् सर्वेषामविरोधेन ब्रह्मकर्म्म समारभे इत्य
नेन सर्षपान्विकीर्य्य शुचीवो हव्या इति एतोन्विन्द्रमिति च मन्त्राभ्याम् आपोहिष्ठेत्यादिभिश्च भुवं प्रोक्ष्य
स्वस्त्ययनं तार्क्ष्यमिति मन्त्रं गृह्यम्पठेत् ततो मण्डपनिम्नतिभागे हस्तमितां वेदीं कृत्वा तस्यां वस्त्रं प्रसा
र्य्य तत्र सुवर्णादिशलाकया रेखा प्राक्पश्चिमायता नव च दक्षिणोत्तरायताः कृत्वा मध्यकोष्ठचतु
ष्टयमेकीकृत्य प्रतिकोणं त्रिषु पदेषु सूत्रन्दद्यात् तथा चतुर्विंशतिरर्द्धपदानि सम्पद्यन्ते मण्डलस्या
न्तेयादिषु कोणेषु शङ्कुचतुष्टयम् विशन्तु भूतले नागा लोकपालाश्च सर्वशः मण्डपेत्रावतिष्ठन्तु ह्या

सं० २

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

तं चतुरंगुलैकमेखलम् वेदीमण्डपोत्तरभागे हस्तविस्तृता वितस्त्युच्छ्रितोच्चा वप्रत्रयवती कार्य्या तत्र प्रथ
मो वप्रस्त्र्यङ्गुलोच्छ्रायः तदुत्तरे प्रत्येकं त्र्यङ्गुलोच्छ्रितो विस्तारस्तु सर्वेषामपि प्रत्येकं त्र्यंगुलः लक्ष
होमे तु मण्डपो द्वादशचतुर्दशषोडशहस्तोऽपि कुण्डं क्षेत्रफलतश्चतुःकरं तद्व्यासतोऽधिकरम्
द्वित्रिचतुरङ्गुलोच्चत्रिमेखलम् तत्रोपरितनी चतुरंगुलविस्तारा अधोगतेऽपि प्रत्येकं त्र्यङ्गुलवि
स्तारे कुण्डोदीशान्यां सार्द्धहस्तविस्तृता तदर्द्धोच्छ्रितशानप्रवरणा पूर्ववत् त्रिवप्रा वेदी कोटिहोमे तु
शतं तदर्द्धं तदर्द्धं षोडशान्यतमहस्तो मण्डपः कुण्डं तु अष्टहस्तं दशहस्तं षोडशहस्तं वा फलतः
तद्व्याससमखातम् मण्डपमध्ये तस्य दक्षिणपश्चिमयोर्यानि द्वयम् वेदी च प्राच्यां द्विहस्तवि
स्तृतेति विशेषः द्विमुखदशमुखशतमुखेषु निर्णययावसरे सन्निवेश उक्तः कर्त्रीसुदिने मासपक्षा
दिकं संकीर्त्य श्रीकामादिर्ग्रहपीडानिवारणानि कुर्यात् तत्रायुतहोमे चत्वारश्चान्त्विजो द्वौ वा
लक्षहोमे द्वादशाष्टौ चत्वारो वा कोटिहोमे ष्टौ होमार्थं चत्वारो द्वारजापका इति द्वादश अयु
तलक्षकोटिहोमेषु त्रिष्वपि षोडश वा ब्रह्माचार्यौ वृण्यात् तन्मध्य एव सर्वत्र वरणमंत्रास्तु आ
चार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः तथा त्वं मम यज्ञेऽस्मिन्नाचार्यो भव सुव्रत यथा

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

तदेवं च कोटिहोमे चोक्तकाम्यात्वं प्राकृताष्टसंख्याबाधेन नवरेति संख्यामात्रम्विधीयते यद्यपि प्रणीतेमां तरं तथा
पि तद्दर्शकमेव सर्वथाज्ञानामावृत्तिरेव एतान्परिविशेषः शतसंख्यया कुण्डेषु नवसंख्याग्रहाद्याकारास्थल
विशेषश्च निवर्त्तते अतोऽग्निस्थापनोत्तरमेव प्रणयनम् यत्तु पारिजाते मध्यकुण्डात्प्रणयनमुक्तम् तन्न
प्रागुदगपवर्गप्रचारबाधात् तेन तत्संरक्षणार्थं नैर्ऋत्यकुण्डादेव प्रणयनं कार्य्यम् अस्तु वा कथञ्चिद
युतहोमे मध्यकुण्डसद्भावात्तस्य च सर्वप्रधानभूतसूर्य्यदेवत्यत्वात्कथञ्चित्ततः प्रणयनं शतमखेषु मध्य
कुण्डनिवेशाभावात्ततोऽग्निप्रणयनं मध्यस्थलसमीपवर्त्तिष्वनेककुण्डेषु तु निगमनाविरहः सर्वोप्ययं
कोटिहोमविचारस्तावद् द्वैतनिर्णये सुविस्तृत इति नेह विस्तरः अथ प्रयोगमात्रसानुसारिणीमद्दृ
ताम्पद्धतिमनुसृत्य ग्रहमखप्रयोगः कर्त्ता आरम्भदिनात्पूर्वसुदिने दानमयूखीयास्मदुक्तप्रकारेण मंन्य
तमप्रकारेण प्राचीं संसाध्य तत्र वितस्त्युच्छ्रायमण्डपनिवेशयोग्यचतुरस्रं चत्वरं कृत्वा पूर्वोक्तदेशका
क३ लोस्मृत्वामुकर्म्मकर्तुं मण्डपं करिष्ये इति संकल्प्य गणेशं कूर्म्मं शेषं वसुधां द्विजांश्च संपूज्यां गच्छ सर्व ग्रा३
कल्याणि वसुधे लोकधारिणि उद्धृतासि वराहेण सशैलवनकानना मण्डपं कारयाम्यद्य त्वद्दर्भमु
भलक्षणम् गृहाणार्घ्यं मयादत्तं प्रसन्ना शुभदा भवेति वसुधायायार्घ्यं दत्त्वा स्योना पृथिवीति तां प्रार्थ्य
मण्डपं हृ[illegible]मध्ये वा कुण्डवेदिं कुर्यात् मण्डपश्चायुतहोमे अष्टहस्तो दशहस्तो वा कुण्डहस्तमि
हे१

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां॰ म॰ २७ वप्रागेणनुश्रमंचापंचैकस्मिन्कोणेवोत्तरंतद्भिन्नः चोदकपाधप्रत्नेरित्युक्तमेवन्द्विचतुर्हस्तकुण्डसमस्त्यापुण्यने
एकैकस्मिन्कुण्डेऽऽकृतयस्त्याकृः नानचतरणस्तु ष्यासतुल्यखातेनवद्रूपस्त्वेचतुस्त्रिद्यकुण्डलानामश्व
मेखलानांविशस्यगुलोच्छ्रतयाचमध्यावकाशविधा एकैकहस्तमधुपिशज्ज्याएवलक्षमाकृतयः कर्तुम
न ४ नारभ्याम्बरेतेपञ्चमेखलापक्षेणप्राकृतमेखलाश्वयवाधस्तूपादिष्टैकहस्तत्वानुरोधेनेतिकृतमाकृः
अत्रैकस्मिन्कुण्डेऽऽज्यभागान्तेकृत्वान्यकुण्डेष्वग्निप्रणयनमितिकेचित् तन्न वारुणप्रघासिकदक्षि
णोत्तरवेद्योरनुष्ठीयमानायांमारुत्यामाग्नेयाद्यष्टहविष्यचाद्याराज्यभागप्रधानाद्यंगानांप्रयगनु
ष्ठानवदिहापितिस्त्रस्राकुतीनिवन्नसंख्ययाभिन्नेषुकोटिसंख्याकेषुहोमेषुलक्षणः एतकुण्डेष्वनुष्ठीय
मानेष्वाज्यभागान्तस्विष्टकृदाद्यङ्गानुष्ठानभेदस्यावुन्याय्यत्वात् किञ्च अप्रमादार्थंनदीक्षाकालीन
जागरेणदीक्षोपयुक्तसंभाररसरक्षणेपिप्रावरणीयाद्यर्थसंभाररसरक्षणार्थमितिदर्शिकजागरण
वत्तिवदिहापि अग्निसमिन्धनार्थं ध्माधनावृत्तिः कथमयवायवनद्याचाग्न्यकुण्डस्थयतोसमिद्ध
कुण्डान्तरस्थानांसमिंधनंभवति अनएवायुतहोमपूर्वलिखितनत्नकृत्तकारवच्चेकुण्डपक्षेप्रधाना
यतनादग्निविभज्यकुण्डेषुप्रणयनवोचार्यैः आज्यभागान्तंकृत्वेत्यादिनाहोमतिशयेसमाप्यपूर् राम:
र्णाहुतीकुर्वीतचेनेनाज्यभागान्तानांस्विष्टकृदादीनांचाङ्गानामावृत्तिर्लिखनम् प्रयोगपारिजातीये २७

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

अर्थान्तरिमारत्नमिति कात्यायनोक्तेश्च तत्र पञ्चविंशतिहस्ते मण्डपे मध्यवंशे दक्षिणोत्तरयोः कुण्डद्वयं निर्माय
विंशते कथञ्चित् मद्भुक्तितो द्वादशाङ्गुलमेखलाप्राप्तेः इतरयोर्मण्डपयोस्तु सुगमत्वान्निवेशः एवन्दशमुखेपि प्राक्
नैकहस्तत्वबाधेन पञ्चकराणि वा दशकुण्डानि तेषु प्रत्येकं दशलक्षाङ्गुलनयः तत्र पञ्चविंशतिहस्ते मण्डपे
मध्यमांशे पूर्वादिषु चतुर्षु दिक्षु मध्यसंलग्नानि चत्वारि कुण्डानि प्राक् तन्मध्यमांशाधिकरणत्वस्य पावकस्य मध्यम
नुग्रहस्य न्याय्यत्वात् प्रागेव नवमांशे तु प्राक् तनौ चतुःकरावेदीसन्नत्वस्य शेषेषु षट्कुण्डानि यद्वा कश्चिदेकांशस्तु रिक्त
एव कुण्डद्वयं मध्यमांशे अष्टस्वंशेषु अष्टावित्यपि केचित् शतमखेपि पञ्चविंशतिहस्ते तावन्मण्डपे शतकु
ण्डनिवेशो बाधित एव पञ्चाशद्धस्ते यद्यपि सम्भवति तथापि सहस्रविप्राणां सुखेन निवेशो बाधितः
अतः शतहस्त एवाविनिवेश उच्यते तत्र मध्यमांशे प्राग्वा उदक्संस्थापञ्चानामेका पङ्क्तिः तेषां च कुण्डानां
प्रत्येकमन्तरं सार्द्धसप्तहस्ताः सप्ताङ्गुलानि च ततः प्रतीच्यामेतादृशमेवान्यत्पङ्क्तित्रयं कार्यं पङ्क्तीनामन्
तरं च द्वाष्टौ हस्ताभ्यां हस्तैर्वा सममिति विग्रहे राष्ट्रि चतुर्हस्ततापि युज्यते द्विहस्तमपि तुल्यसमाङ्गुलनयः
समान्येव अन एव हेमाद्रौ अयुते त्वष्टहीनत्वे कुण्डं स्याद्धस्तमात्रकम् द्विपञ्चाशल्लक्षहोमे तु कोटिहोमे च
तुर्गुणामिति यद्यप्यौत्सर्गिकैकवचनेनैव वियुक्तहस्ताप्यनुपपत्त्या द्विवचनवद्बहुवचनान्तेनापि क्रियते
यथा सप्तदश प्राजापत्यान् पशूनालभत इत्यत्र चोदकप्राप्तैकपशुनिःपन्नहृदयाद्येकादशावदान
गणानुरोधेन प्रजापतिर्देवता यस्यासौ प्राजापत्यः प्राजापत्यश्चासौ प्राजापत्याः इति कृतद्धितानामेकए

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

नं३ म२

शां॰म॰ २६ तस्मारोग्यं प्रियाः पुत्रास्तथायुर्वृद्धिस्तथैव च । सर्वपापक्षयश्चैव जायते नृपसत्तम ॥ अनावृष्टिभयञ्चैव उत्पा
तभयमेव च । दुर्भिक्षग्रहपीडाश्च प्रशमं यान्ति भूतले ॥ एतत्पुण्यं पापहरं सर्वकामफलप्रदम् । सनत्कुमारमु
निना पार्थिवाय निवेदितम् ॥ सर्वोपसर्गशमनं भवनाशं वा ये कारयन्ति मनुजा नृप कोटिहोमम् । भोगानवाप्य म
त्सोभिमतांश्च कामान्ते यान्ति शक्रसदनं सुविशुद्धसत्वाः ॥ अत्र पद्येन सहस्राः साधस्काऽस्यैकसंज्ञयो
पक्रान्तेषु कल्पान्तेषु च निकापिसंज्ञकेषु ग्रन्थमध्योम्नातधर्म्मकस्य धर्म्मा उत्तरेष्वनाम्नातधर्म्मकेषु निका
पित्वावान्तरसामान्यान्माहस्त्रसाधस्काघकनामकत्वाच्च प्रवर्त्तत इत्यष्टमनिकापिनां तु हर्वस्यान्तरे
षु प्रवृत्तिः स्यादित्यत्र निरस्तापि तथैव च चतुर्विधो महाराजकोटिहोम इति चतुर्णां कोटिहोमत्वा
वान्तरसामान्येन सधर्म्मकस्यैकमुखस्य धर्म्मा अनाम्नातधर्म्मकेषु द्विमुखादिषु प्रवर्त्तन्ते न ते
षां विकृतित्वम् । तत्र द्विमुखेनावकुण्डद्वयं प्रकृतिप्राप्तेषु शतपञ्चाशत पञ्चविंशतिहस्तमण्डपे द्विमुखमध्ये
नवमांशे कार्य्यम् । तस्यैव मध्ये नवमे नवमांशे तु कुण्डं कुर्य्याद्विचक्षण इति प्रकृतौ वचनेनात्रापि तथा धप
प्राप्तेः तच्च कुण्डद्वयं षट्हस्तं दशमिते होमे षट्करस्य प्रवक्षत इति भविष्यत्पुराणात् पञ्चहस्तं वा
कुण्डपञ्चकरं प्रोक्तं दशलक्षकृतौ क्रमात् इति तन्त्रान्तराच्च दशलक्षोत्तरमेकोनकोटिपर्य्यन्तं
पञ्चषट्करैत्यर्थः । अयुतहोमतः प्राप्तमेकहस्तत्वं प्राकृतं परिमाणं त्विदं त्वार्थत्वापत्याऽप्राकृ रामः २६

[illegible]

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

नः सविज्ञेयः कोटिहोमो न संशयः स्वल्पैर्होमैः कार्य्यः स्याद्दीर्घकालादिकेऽपि वा दशमुखस्तथा कार्य्यः को
टिहोमः शुभे मते विप्राणां द्विशते तत्र प्रविभज्य नियोजयेत् वेदविज्ञानशीलाः स्युर्वर्जवन्तो जितेन्द्रियाः यत्र कु
ण्डद्वयं कृत्वा विभज्य च विभावसुम् होमं कुर्युर्द्विजाग्र्याः संस्कृत्य विधिपूर्वकम् शतं तत्र नियोज्यं स्याद्विप्राणां
च विभज्य वै मासेऽथवार्द्धमासे वा कार्य्यकालव्यपस्थिते तत्रापि द्विमुखः कार्य्यः कोटिहोमो विचक्षणैः तदानुसृत्य
याजन्यजमानः समापयेत् कालेन बहुना राजन् तदा वैकमुखो भवेत् एककुण्डस्थितो वह्निरेकचित्तैः समाहितैः
यथालाभस्थितैर्विप्रैर्ज्ञानशीलैर्विचक्षणैः न संख्या नियमस्तत्र ब्राह्मणानां नरोत्तम न कालनियमश्चैव
स्वेच्छा जनः स उच्यते आढ्यस्याकर्तुकामस्य चातुर्मास्यादिकं भवेत् तदा प्रशस्तः कर्तव्यो कर्तव्यः सार्व
कामिकः अयमेकमुखो राजन् कालेन बहुना भवेत् बहुविघ्नश्च कालो वै तस्मात्संक्षेपमाचरेत् यतो वै
वित्तमायुश्च वित्तं वै वास्थिरे सदा अतः संक्षेपतः कार्य्यं धर्म्मकार्य्यं प्रशस्यते ततः समाप्ते यज्ञे तु कार
येत्तु महोत्सवम् शंखतूर्य्यनिनादेन ब्रह्मघोषरावेन च ततस्तु दक्षिणां दद्याद्विप्रान् ऋत्विजः श्रद्धयान्वितः एकैकै
केन कर्त्तव्यं कुण्डलैर्विविधैरपि गोशतं चैव दानं च अश्वानां च शतं तथा सहस्रं तु सुवर्णस्य सर्वेषामे
व दापयेत् ग्रामं गजं रथं श्वेतैः पूजयेच्च पुरोहितम् दीनानाथ कृपणान्सर्वांश्च स्त्रीश्चापि पूजयेत् तत
श्चावभृथस्नानं पानैर्घटैः पूर्वकल्पितैः लक्षहोमोक्तमन्त्रेण सदा विजयकारिणा एवं समापयेद्यस्तु कोटि
होमसमं शुभम् ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां॰म॰
२५

सर्वान्कामानवाप्नोति ततो विष्णुपुरं व्रजेत् यः पठेच्छृणुयाद्वापि ग्रहशांतिं अयं नरः सर्वपापविशुद्धात्मा पदमिन्द्र
स्य गच्छति अश्वमेधसहस्राणि दश वाष्टौ च धर्मवित् कृत्वा यत्फलमाप्नोति कोटिहोमात्तदश्नुते ब्रह्मह
त्यासहस्राणि भ्रूणहत्यार्बुदानि च नश्यन्ति कोटिहोमेन यथा वच्छिवभाषितम् इति कोटिहोमः अथ श
तमुखकोटिहोमः सगरउवाच यत्कृत्वा कर्मणा ब्रह्मन्कोटिहोमः सुदुष्करः कालेन महता चैव कर्तुं श
क्यः कथं त्वया नियमाद्ब्रह्मचर्याद्यादुष्कराद् इति मे मतिः निरोधो ब्राह्मणानां च भूशय्यादिः सुदुष्करः
कार्य्याणामलब्धीयस्त्वात्पर्वकालाद्यपेक्षया एतद्विज्ञायते ब्रह्मन्सर्वेशास्त्रेषुपच्यते कोटिहोमस्य संक्षे
पं वद मे ब्रह्मसंभवम् सनत्कुमारउवाच शतानने दशमुखे वाद्विमुखे वैकमुखे तथा चतुर्भुजो महाराज को
टिहोमो विधीयते कार्य्यस्य गुरुतां ज्ञात्वा नैकरूपमथ पर्वणः यथा संक्षेपतः कार्य्यः कोटिहोमस्तथा शृ
णु कृत्वा कुण्डशतं दिव्यं यथोक्तं मानसम्मितम् एकैकस्मिंस्तथा कुण्डे दशविप्रान्नियोजयेत् सघृ॰
पक्षे तु विप्राणां सहस्रं परिकीर्तितम् एकस्यानप्रणीतेग्नौ सर्वतः परिभाविते एकस्यानात्सर्वतः सर्वस्मि
न्कुण्डे परिभाविते संस्कृते ग्नौ प्रणीतेऽध्वर्यः होमं कुर्युर्द्विजाः सर्वकुण्डकुण्डे यथोदितम् यथा कुण्ड
व कृत्वेपि राजसूयमहाक्रतौ नवाग्निवत्फलं च स्यान्नचयज्ञोऽपि भिद्यते तथा कुण्डशतेऽप्यत्र ब्रह्मतर्त्वि
क्षु नियोजिते एक एव भवेद्यज्ञः कोटिहोमा न संशयः एवं यः क्रियतेऽस्मिंश्च व्याकुलेऽपि कार्य्यगौरवात् शतान

रा॰म॰
२५

कुण्डमण्डपवेदीनांविशेषोयंनिबोधमे कोटिहोमेचतुर्हस्तंचतुरस्रञ्चसर्वशः योनिवक्त्रद्वयोपेतांतदप्याकु
स्त्रिमेखलम् सर्वतश्चतुर्हस्तामिति विस्तारायामखातेष्वित्यर्थः योनिवक्त्रद्वयोपेतामित्येकायोनिः पश्चि
मतोन्यादक्षिणतइतिहेमाद्रिः वक्त्रकण्ठः योनिकण्ठयुतमितिपितामहचरणाः वेदिश्चकोटिहोमेस्या
द्वितस्तीनाञ्चतुष्टयम् चतुरस्रासमाताद्वित्रिभिर्वप्रैःसमावृता वप्रप्रमाणंप्रोक्तमत्रवेदिकायास्तथोच्छ्र
याः उक्तमयुतहोमे तथाषोडशहस्तःस्यान्मण्डपश्चचतुर्मुखः पूर्वद्वारेचसंस्थाप्यबह्वृचंवेदपारगम्
यजुर्वेदंतथायाम्येपश्चिमेसामवेदिनम् अथर्ववेदिनंतद्वदुत्तरेस्थापयेद्बुधः अष्टौतुहोमकाः कार्य्या
वेदवेदाङ्गवेदिनः एवंद्वादशतानेवविप्रान्वस्त्रमाल्यानुलेपनैः पूर्ववत्पूजयेद्भक्त्यासर्वाभरणभूषितैः
रात्रिसूक्तञ्चरौद्रञ्चपावमानंसुमण्डलम् पूर्वतोबह्वृचःशान्तिःपठन्नास्तेउदङ्मुखः शाक्रंरौद्रञ्च
सौम्यञ्चकौष्माण्डंशान्तिमेवच पठेत्तुदक्षिणद्वारियाजुर्वेदिकमुत्तमम् सौपर्स्नमथवैराजमाग्नेयंरौ
द्रसंहिताम् ज्येष्ठसामतथाशान्तिंछन्दोगःपश्चिमेपठेत् शान्तिसूक्तंचतथातथाशाकुनकंशुभम्
पौष्टिकञ्चमहाराजन्तुत्तरेणाप्यथर्ववित् पञ्चभिस्सप्तभिर्वापिहोमःकार्य्योयथैर्वत स्नानेस्ना
नेचमंत्रास्स्युस्तएवमुनिसत्तम वसोर्द्धाराविधानन्तुलक्षहोमवदिष्यते अनेनविधिनायस्तुकोटि

॥ कोटिहोमविधि ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां॰म॰ २५

विद्यार्द्धितवयोवृद्धान्नैर्हस्यान्संयतेन्द्रियान् स्वकर्म्मनिरतान्शुद्धान्यज्ञशीलान्प्रयत्नतः चिन्तयेत्तत्र दे
वेशान्पञ्चाशत्सप्तपावके मुखानितस्यचत्वारिसप्तजिह्वानिपार्थिव एकजिह्वमथैकन्तुतस्मिन्सार्वका
मिकम् धूमायमानेनवृथाहोतव्यंललितेनते अग्निंपूर्वमुखेःकार्यायजुर्भिश्चोत्तरामुखैः आधारा
वाज्यभागौतुपूर्वंकृत्वाविचक्षणाः परितश्चपरिस्तीर्य्यकल्पितेचतथासने ब्राह्मणःपूर्वमेवन्तुसर्वपश्चा
त्समाचरेत् होमोव्याहृतिभिश्चैवसर्वस्तत्रविधीयते प्रणवादिभिश्चतल्लिङ्गैः स्वाहाकारान्तयोजितैः जु
हुयात्सर्वदेवानांवेघायेचावकल्पिताः एवमत्रकल्पयेद्यज्ञंकोटिहोमाख्यमुत्तमम् तिलाःकृष्णास्तथाभ्य
क्ताःकिञ्चिद्व्रीहिसमन्विताः किञ्चिद्यवसमायुक्ता इतिक्वचित्पाठः होतव्याःकोटिहोमेतुसमिधःसु
पलाशजाः दूर्व्वादूर्व्वासहस्रैस्तुदद्यात्दूर्व्वाहुतिंशुभाम् पञ्चमेनन्मुखेराजन्सर्वकामार्थसिद्धये
दूर्व्वाहुत्यःसमाख्याताःकोटिहोमेनराधिप सहस्राणिन्तपत्रैस्तुदशशास्त्रविशारदैः प्रारभ्यदिनमा
रभ्यब्राह्मणैर्ब्रह्मवादिभिः होतव्यम्यजमानेश्चत्वथवासुपुरोहितैः क्रोधलोभादयोहोपावर्ज्जनीया
ःप्रयत्नतः यजमानेनराजेन्द्रसर्वकामानभीप्सता मात्स्ये अस्माच्छतगुणःप्रोक्तः कोटिहोमःस्वयम्भु
वा आहुतीभिःप्रयत्नेनदक्षिणाभिःफलेनच सर्वदिक्षुहदेवानामावाहनविसर्जनम् होममन्त्रास्तएवोक्ता

राम: २५

मध्ये तु मण्डपस्यापि कुण्डं कुर्याद्विचक्षणः अष्टहस्तप्रमाणेन आयामेन तथैव च मेखलात्रितयन्तस्य
यादृशाङ्गुलविस्तृतम् तत्प्रमाणान्तथा योनिं कुर्वीत सुसमाहितः कुण्डस्य पूर्वभागे तु वेदीं कुर्याद्विचक्ष
णः चतुर्हस्तां समां चैव हस्तमात्रोच्छ्रितां नृप स्थापनञ्चैव देवानां कुर्याद्यत्नेन बुद्धिमान् उपलिप्य त
तो भूमिं मण्डपस्य प्रकल्पयेत् स्थापयेद्दिक्षु सर्वासु तोरणानि विचक्षणः एवं सम्भृतसम्भारः पुरोधास्सु
समाहितः पुण्याहजपघोषेण होमकर्म समाचरेत् स्थापयित्वा सुरान्वेद्यां वक्ष्यमाणान्नरेन्द्र म
ब्रह्माणम्पूर्वभागे तु मध्ये देवं जनार्दनम् पश्चिमे तु तथा रुद्रं वसूनुत्तरतस्तथा ईशान्याञ्च ग्रहान्स
र्वान् आग्नेय्यां मारुतस्तथा वायुं भूम्यान्तथैशान्यां लोकपालान्क्रमेण तु एवं संस्थाप्य विबुधान्यथा
स्थानं नृपोत्तम पूजयेद्विधिवद्भक्त्या गन्धमाल्यानुलेपनैः वेदोक्तमन्त्रैस्तल्लिङ्गैः पुराणोक्तैः पृथक्पृ
थक् आदित्या वसवो रुद्रा लोकपालास्तथैव च ब्रह्मा जनार्दनश्चैव शूलपाणिर्महेश्वरः अत्र स ९५
न्निहितास्सर्वे भवन्तु सुखभागिनः पूजां गृह्णन्तु सर्वत्र मया भक्त्योपपादिताम् प्रकुर्वन्तु शुभं सर्वे
यज्ञकर्तुः समाहिताः एवं संपूजयित्वा तान्देवान्यत्नेन शुद्धधीः नैवेद्यैर्विविधैर्भक्ष्यैः फलैश्चैव सुशोभितैः
ततस्तु तैर्द्विजैस्सर्वैः कुण्डस्य विधिपूर्वकम् कुर्यात्संस्कारकरणं यथोक्तं वेदवित्तमैः ततस्समाह्वयेद्वह्निं
नामाख्यातन्तु नार्चितम् निर्ज्जयोर्ये द्विजास्तत्र शतसंख्यान्नृपोत्तम अलाभे च बहूनाञ्च यथालाभन्नि

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां॰म॰
२३

सगरउवाच भगवन्महदुत्पातं संभवे भूप्रकम्पने निर्घाते पांशुवर्षे च गृहभङ्गे तथैव च जन्मनक्षत्रपीडासु
अनावृष्टिभयेषु च क्रूरासु ग्रहपीडासु दुर्भिक्षे राष्ट्रविप्लवे व्याधीनां संभवे जाते शरीरे चातिपीडिते
क्लेशे वह्निनि चोत्पन्ने किं कर्त्तव्यं नरोत्तमैः स्वर्गस्य साधनं यत्तत्कीर्त्तितं धनदं तथा प्रब्रूहि त्वं द्विजश्रे
ष्ठ तथारोग्यप्रदं नृणाम् सनत्कुमारउवाच शृणु राजन्प्रवक्ष्यामि शान्तिकर्म्मणमनुत्तमम् कोटिहोमा
ख्यमतुलं सर्वकामफलप्रदम् ब्रह्महत्यानि पापानि येन नश्यन्ति तत्क्षणात् उत्पाताः प्रशमं यान्ति महत्सं
पद्यते सुखम् विधानं तस्य वक्ष्यामि शृणुष्वैकमनो भव देवागारे च भवने तीर्थे वा शिवसन्निधौ पर्वते वा
थ कुर्वीत यद्वच्छेच्छ्रेयमात्मनः शुभनक्षत्रयोगे च वारे सर्वगुणान्विते यजमानस्यानुकूले कोटिहोमं समा
चरेत् पूजयित्वा प्रयत्नेन ब्राह्मणान्वेदपारगम् वस्त्रैश्च भूषणैश्चैव गन्धमाल्यानुलेपनैः प्रणम्य वि
धिवत्तस्मै चात्मानं विनिवेदयेत् त्वमेव नः पिता माता त्वं गतिस्त्वं परायणम् त्वत्प्रसादेन विप्रर्षे सर्व
स्यात्ममनोगतिम् आपद्विमोक्षाय च मे कुरु यज्ञमनुत्तमम् कोटिहोमाख्यमतुलं शान्त्यर्थं सार्वका
मिकम् पुरोहितस्ततः प्राज्ञः शुक्लाम्बरधरः शुचिः ब्राह्मणैः संवृतः पुण्यैः सम्यतः सुसमाहितैः
भूमिभागे समे शुद्धे प्रागुदक्प्रवणे तथा पुण्याहं वाचयेत्पूर्वं कृत्वा विप्रांस्तु पूजयेत् ततस्समाहितो
विप्रैः स्तत्रयेन्मण्डपं शुभम् उत्तमं शतहस्तं च तदर्द्धेन तु मध्यमम् अधमस्तु तदर्द्धेन शक्तिकालोद्भवे

राम॰
२३

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

उदुंवरीमथाश्वींचक्रान्त्वींकोठरवर्ज्जितानाम् वाकुमात्रींस्स्रुवंकृत्वाततस्तंभद्रयोपरि ह्व तथारांतथासम्य
गय्नस्रुपरिपातयेत् श्रावयेत्सूक्तमाग्नेयंवैष्णवंरौद्रमैन्दवम् महावैश्वानरंसम्यग्जप्य ह्व सामचपाठ
येत् स्नानञ्चयजमानस्यपूर्ववत्स्वस्तिवाचनम् दातव्यायजमानेनपूर्ववद्दक्षिणापृथक् कामक्रो
धविहीनेनक्रान्त्विग्भ्यःशान्तचेतसा नद्वादशचाष्टौवालक्षहोमेपिऋत्विजः कर्त्तव्याःशक्तितस्तच्च
वाप गुरोविमत्सराः ब्रह्माचार्य्यसहितानामेवेयंसंख्येतिकेचित नवग्रहमखात्सर्वंलक्षहोमेदशोत्तरम्
दद्यात्त्वमुनिशार्दूलभूषणान्यपिशक्तितः शयनानिसवस्त्राणिहैमानिकटकानिच कर्णाङ्गुलीप
वित्राणिकण्ठसूत्राणिशक्तितः नकुर्य्याद्दक्षिणाहीनंवित्तशाठ्येनमानव अदत्वाहोमलोपोक्तकु
लक्षयमवाप्नुयात् अन्नदानेयथाशक्त्यादातव्यंभूतिमिच्छता मंत्रहीनेकृतोयस्माद्दुर्भिक्षफलदोभ
वेत् तथा तस्मात्पीडाकरोतीवयएवभवतिग्रहः तमेवपूजयेद्भक्त्यागौवाचीन्वायथाविधि तथा
पूज्यतेशिवलोकेचवस्वादित्यमरुद्गणैः यावत्कल्पशतान्यष्टौअथमोक्षमवाप्नुयात् तथा पुत्रा
र्थीलभतेपुत्रंधनार्थीलभतेधनम् भार्य्यार्थीलभतेभार्य्याकुमारीचशुभम्पतिम् भ्रष्टराज्यस्तथा
राज्यंश्रीकामःश्रियमाप्नुयात् यंयंप्रार्थयतेकामंतन्तम्प्राप्नोतिपुष्कलम् निष्कामःकुरुतेय
स्तुपरम्ब्रह्मसगच्छति इतिलक्षहोमः अथकोटिहोमः तत्राप्ययुतलक्षहोमप्रकरणएवनि

शां॰ म॰ २२ केतुसंदर्शने चैव आदित्यस्य च कम्पने कृष्णवर्णेऽथवा सूर्ये तथा छिद्रसमन्विते रजःकृष्टिस्तथा नद्योवि
परीता वहन्ति च निर्गतं गगनाद्धूमे द्वारिमध्ये च यत्स्थितम् उपसर्गास्तथा लोके रक्षं नृक्षयकारकाः ग्रस
योर्महाः पञ्च अथ सप्त सुराधिप ग्रहणेश्चन्द्रसूर्य्यस्य ग्रहैर्वीक्ष्यमसंस्थितैरित्यादि तथा कम्पने खेद
ने गात्रे अबुधानार्थ जल्पनम् देवतासुरराध्यक्षउत्पाता क्षयकारकाः लक्षहोमं प्रकुर्वीत कोटिहोमं तथापि
वेति मात्स्ये अस्माद्द्विगुणः प्रोक्तः लक्षहोमे भवेत्कुण्डयोनिवक्त्रे त्रिमेखलम् व्यासतोस्त्वयमेवा
आकुतीभिः प्रयत्नेन दक्षिणाभिस्तथैव च द्विहस्तविस्तृतं तद्वच्चतुर्हस्तायतं पुनः लक्षहोमे भवेत्कुण्डयो
निवक्त्रं त्रिमेखलम् व्यासतो द्विहस्तविस्तृतम् फलतश्चतुर्हस्तायतम् भवतीत्यर्थः तथा तस्य चोत्त
रपूर्वेण वितस्तित्रयसंमितम् प्रागुदक्प्रवणम् तद्वच्चतुरस्रं समन्ततः विष्कुम्भार्द्धोच्छ्रितं प्रोक्तं स्थ
ण्डिलं विश्वकर्म्मणा संस्थापनाय देवानां वप्रत्रयसमावृतम् तस्मिंस्त्वावाह्य देवान् पूर्ववत्पु
ष्पतण्डुलैः गरुत्मानधिकस्तत्र संपूज्यः श्रियमिच्छता सामध्वनिशरीरस्त्वं वाहनं परमेष्ठिनः
विषपापहरो नित्यमतः शान्तिं प्रयच्छ मे अथ गरुडावाहनमन्त्रः पूर्ववत्कुम्भमामन्त्र्य तद्वद्धोमं स
माचरेत् सहस्राणां शतं तत्र हुत्वा समित्स्वकादिकम् पूर्ववद्देवसमिदाज्यचरुहोमं पूर्वोक्तैरेवमं
त्रैः कुर्यात् गरुत्मतस्तु सुपर्णोसि गरुत्मानिति इन्द्रमिन्द्रमितिवा मन्त्रः घृतकुम्भवसोर्धारां पातये राम: २२

दृधिदेवताः ग्रहाणामुत्तरे पार्श्वे न्यसेत्प्रत्यधिदेवताः अथ विनायकादिलक्षणानि चतुर्भुजस्त्रिनेत्र
श्च कर्त्तव्यो गजाननः नागयज्ञोपवीतश्च शशाङ्ककृतशेखरः दक्षे दन्तकरे दद्याद्द्वितीये चाक्षसूत्रकम्
तृतीये परशुं दद्याच्चतुर्थे मोदकन्तथा शक्तिम्बीणां तथा शूलं खड्गञ्चक्रञ्च दक्षिणे चन्द्रबिम्बमधो
वामे खेटं मूर्द्धकपालकम् टङ्कञ्च विभ्रतीं सिंहारूढा तु दिग्भुजा एवं देवी समुद्दिष्टा दुर्गा दुर्गार्त्ति
हारिणी धावद्धरिणपृष्ठस्थो ध्वजधारी समीरणः वरदानकरो धूम्रवर्णः कार्य्यो विजानता नीलो
त्पलाभं गगनं तद्वर्णावरधारि च चन्द्रार्कहस्तं कर्त्तव्यं द्विभुजं सौम्यखण्डवत् द्विभुजौ देवभिषजौ
कर्त्तव्यौ नृपसंस्थितौ तयोरौषधयः कार्य्या दिव्या दक्षिणहस्तयोः वामयोः पुस्तकौ कार्य्यौ दर्शनी
यौ तथा द्विजाः एकस्य दक्षिणे पार्श्वे वामे चान्यस्य यादवः नारीयुगं प्रकर्त्तव्यं स्वरूपञ्चारुदर्शि
नम् एतु भाण्डकरे कार्य्यं चेद्रशुक्लाम्वरे तथा अथ लोकपालरूपाणि तत्रेन्द्राग्नियमरूपाणपाधिप्र
त्यधिदेवतोक्तानि खड्गचर्म्मधरो वालो निर्ऋतिर्नरवाहनम् ऊर्द्ध्वकेशो विरूपाक्षः करालः का
लिकाप्रियः वरुणो व्यापतिः स्वर्णवर्णो मकरवाहनः वायुर्विनायकादि पञ्चकेऽजः सोमो यस्य
विष्णुः अनन्तः सर्प्पः प्रत्यधिदेवतासु इत्युक्तहोमः अथ लक्षहोमः तत्र ग्रहपीडादीनि निमित्तान्यनु
क्तान्ययुतहोमारंभो देवीपुराणेपि लक्षहोमम्प्रवक्ष्यामि यथा प्रोक्तन्तु शम्भुना भूमिकम्पादिदृष्टा

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां॰म॰ कुक्कुटश्च तथा द्वारात तस्य दक्षिणहस्तयोः पताकाम्वेजयंतीं स्याच्छक्र ५ कार्य्यो चवामयोः विघ्नेश ५ को
२१ मोदकोपद्मपरशुं चक्रधरांकुशमात् प्रदक्षिणं दक्षिणाधःकरादारभ्य नित्यशः पद्मासनस्थो जटिलो
ब्रह्माकार्यश्चतुर्भुजः अक्षमालां स्रुवं बिभ्रत् पुस्तकं चकमण्डलुम् चतुर्वदगजारूढो वाग्नाकुलिश
धृत्वकरः प्राचिःपतिः प्रकर्त्तव्यो नानाभरणभूषितम् ईश्वन्नीलोत्पलम ५ कार्य्यो दण्डहस्तो विजानता
रक्षहेकृपाशहस्तश्च महामहिषवाहनः कालः ५ करालवदनो नीलाङ्गश्च विभीषणः पाशहस्तोद
ण्डहस्तः कार्य्यो द्विकरामेवान् अपीच्यवेषरवाकारं द्विभुजं सोम्यदर्शनम् दक्षिणे लेखनीं चित्रगु
प्तं वामे तु पात्रकम् पिङ्गलश्मश्रुकेशाक्षः पीनाङ्गजठरोरुणः साक्षसूत्राग्निः सप्तार्चिः शक्तिधार
कः विहितं धर्मरेण स्वकरमन्यं धकल्पयेत् आपस्त्रीनुपवगिन्वः स्वेनामकरवाहनम् दधान्नाः
पाशाङ्कुलिशामुक्तोभरणभूषिताः शुक्लावर्णो महीकार्य्यो दिव्याभरणभूषिता चतुर्गणी पद्माकार्य्या
पद्मगनापाविविहंगो गिंद्रस्य चोक्ते वामे [illegible] च्याः करे कार्य्या सोम्यासंतानमञ्जरी वरदामण्डिनाका
र्य्याद्विभुजत्तधतथाश्रुची जज्ञोपवीती हंसस्य एकवक्त्रश्चतुर्भुजः अक्षंस्तुवंश्रुवं विभ्रत्कुण्डिका
चप्रजापतिः अक्षं अक्षमालांकुण्डिकां कमण्डलुम् अक्षसूत्रधरः कुण्डिकापुच्छभूषणाः एक राम:
भोगास्त्रिभोगावासर्वे कामोविभीषणाः अक्षवक्षणामुञ्जेम यहारणादक्षिणेपार्श्वेस्थापये २१

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

त्वेन्वलयग्रहमखेषुतदंगकेषु च शान्तिकर्म्मसु केकस्मात्पुत्रांगप्रधानादरेणास्त्वंतरोक्तप्रधानभूतायुतादिहो
मन्विनापिशान्तिनरोक्तग्रहयागान्तराभ्यासान्तरं विनैकशाखायत्नग्रहमखानाभ्यास मात्रात्सिद्धमिव पू
जाग्रहदेवतयोः समानोपासनानुष्ठानं कथंचित ताविशेषमासंगच्छेन नग्रहयजोहोमयोरगत्वे त्वंगमावा तेष्वा
नमेवस्यात् अथग्रहादीनां लक्षणानि मात्स्ये पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः सप्ताश्वरथसंस्थ
श्च द्विभुजः स्यात्सदा रविः श्वेतः श्वेताम्बरधरो दशाश्वः श्वेतभूषणः गदापाणिर्द्विबाहुश्च कर्त्तव्यो व
रदः शशी रक्तमाल्याम्बरधरः शक्तिशूलगदाधरः चतुर्भुजो मेषगमो वरदः स्याद्धरासुतः पीतमाल्या
म्बरधरः कर्णिकारसमद्युतिः खड्गचर्म्मगदापाणिः सिंहस्थो वरदो बुधः देवदैत्यगुरू तद्वत्पीतश्वे
तौ चतुर्भुजौ दण्डिनौ वरदौ कार्य्यौ साक्षसूत्रकमण्डलू इन्द्रनीलद्युतिः शूली वरदो गृध्रवाहनः
बाणबाणासनधरः कर्त्तव्योर्कसुतः सदा करालवदनः खड्गचर्मशूली वरप्रदः नीलः सिंहासनस्थ
श्च राहुरत्र प्रशस्यते धूम्रा द्विबाहवः सर्वे गदिनो विकृताननाः गृध्रासनगता नित्यं केतवः स्युर्वरप्र
दाः सर्वे किरीटिनः कार्य्या ग्रहा लोकहितावहाः अङ्गुलेनोच्छ्रिताः कार्य्याः शतमष्टोत्तरं सदेति अ
थाधिदेवता प्रत्यधिदेवतालक्षणानि विष्णुधर्म्मोत्तरे पञ्चवक्त्रो वृषारूढः प्रतिवक्त्रं त्रिलोचनम्
कपालशूलखट्वाङ्गी चन्द्रमौलिः सदाशिवः अक्षसूत्रञ्च कमलन्दर्पणञ्च कमण्डलुम् उमा
बिभर्त्ति हस्तेषु पूजिता त्रिदशैरपि कुमारः षण्मुखः कार्य्यः शिखण्डकविभूषणः रक्ताम्बरधरो देवो

कृत्यरत्ना॰ २६ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

ग्रां॰म॰ २० सर्वथाप्याहुतिहोमेन ग्रहादिदेवताः इति प्रधानं चान्न ग्रहयज्ञेऽपहोमोऽयुतहोमादिश्च श्रीकामः शान्तिकामो
वा ग्रहयज्ञं समाचरेदित्यादिना तत्सजातीयहोमयोः फलसम्बन्धात् ग्रहयज्ञत्रिधेत्युक्त्वा प्रथमोऽयुतहोमस्त्वा
दिनायुतलक्षकोटिहोमानां ग्रहयज्ञविशेषत्वेनोपक्रमात् तस्मादयुतहोमस्य विधानन्तु समाचरेदित्युपसं
हाराच्च ग्रहा ग्रहदैवत्यकर्म्मसमूहमाराराभ्यतदुपरधानीतिवल्लिङ्गसमवायेन ग्रहपरशब्दस्तात्पर्यतस्त्व
युतहोमादीनामेव प्राधान्यं ग्रहहोमस्त्वङ्गमित्याहुः तदाशयन्त्वज्ञातो यो हि कामशब्देन फलसंबन्धः श्री
कामश्शान्तिकामो वा ग्रहयज्ञं समाचरेदित्यादि सतावद्दक्षयज्ञाहोमयोरेवोचितः ग्रहसंबन्धप्राप्तेर्ग्र
हयज्ञशब्दस्यात्र तत्परत्वात् अयुतहोमादिशब्दानां ग्रहयज्ञसमानाधिकरण्येन ग्रहयज्ञनामत्वानुलिङ्ग
समवायेन तदङ्गत्वेन अर्थवादिकः फलसंबन्धस्तु अनेन विधिना यस्तु ग्रहयज्ञं समाचरेत् सर्वान्कामा
नवाप्नोति प्रेत्य स्वर्गे महीयते इत्यन्तयज्ञदेवयज्ञमासङ्गतिकरणादानेवितिः अनुशिष्टयोर्यज्ञाहोमयोः
सदेवायुतहोमोऽयमित्याद्युपक्रमम् निर्विघ्नार्थमपुनिश्रेष्ठ इत्यादिना त्वयुतहोमादीनामपि स्मृतिषु प्राया
र्थवादिकमेव फलम् अत्र कामशब्दोपनीते फले सत्यार्थवादिकं संबध्यते नवेति तु विचारान्तरम् किन्तु
याज्ञवल्क्यादिस्मृतिषु न तावदयुतहोमादीनां विधिनाप्यनुवादः अतो ग्रहयज्ञाहोमयोः प्राधा
न्याभावे प्रपञ्चस्यापि तिकर्तव्यता संबंधो न स्यात् अतो ग्रहयज्ञाहोमयोरपि प्राधान्यमप्याति अत एव कश्चि रामः २०

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

होमस्य यज्ञेषु प्रतिष्ठादिषु कर्मसु निर्विघ्नार्थं मुनिश्रेष्ठ तथोद्वेगाद्भुतेषु च वश्यकर्माभिचारादिनिमित्तेषु चोच्चा
टनादिकम् नवग्रहमखं कृत्वा ततः काम्यं समारभेत् अन्यथा फलदं पुंसां न काम्यं जायते क्वचित्
तस्मादयुत होमस्य विधानेनानु समारभेत् विवाहेत्यादिना च विवाहादिषु काम्येषु च कर्मस्वङ्गं प्रयुक्तेः
अत्र ग्रहस्वरूपवर्णदेशगोत्राग्निस्थापनमुखाकारस्थापनहोममन्त्रौ चन्दनधूपदीपनैवेद्यसमिद्दक्षि
णाधिदेवता प्रत्यधिदेवतोपदेशकवाक्येषु चाधिदेवताप्रत्यधिदेवता विनायकादि पञ्चलोकपाला
नामनेकस्मृतिपुराणभेदेन भूयो विशम्वादि रनेकैः पर्य्यायशब्दैरुपस्थितेर्नाम्नैकवेधशब्द नियमः
नापि मन्त्रवर्णेनैकशब्दोपस्थितिः शब्दविशेषे देवतात्वानुपपत्तेः तस्मात्कतयामन्त्रविनियोगेन मन्त्रा
णान्देवताप्रापकत्वायोगात् एषाम्वा कुत्रचित्ताप्रत्यक्षलिङ्गत्वाच्च अतो द्रव्यत्यागादिस्वरूपादि
निर्देशकस्मृतिमन्त्रवर्णोपस्थितिशब्दानामन्यतमेन शब्देनोद्देशाय्रहादीनामिति शिष्टाचारोप्ये
वम् अत्र व्याहृतिकरणकेऽयुतहोमेऽग्निवायुसूर्य्यप्रजापतय एव देवता नवग्रहा एंन्द्रादिवत्तत्प्रका
शकत्वेन विनियोगाभावात् अत एव पारिजाते ॐ भूर्भुवः स्वः इति तिसृभिर्व्याहृतिभिर्योजयेत्
आभिश्च होमे तिसृभिश्च तूष्णीं स्यात्समासेन इति समस्ताभिरेव होमः स चाग्निवायुसूर्य्यदेवत्यः

दानमिति आश्वलायनः यथाशक्ति ततो विप्रान् ऋत्विजश्चैतरानपि एकमेकाहुतौ विप्रे होमेत्वनेन
योजयेत् अत्यर्थमिध्यमश्चापि विप्रमेकं शताहुतौ सहस्रस्याहुतेर्वैकं यद्यन्नोपि प्रयोजयेत् तत्रैव
तस्माद्दातुमशक्तोपि दक्षिणाश्चान्नमेव वा जपेः ग्रहाणामेस्तोत्रैश्च ततोभ्यर्थयेत्पूर्वम् स्कान्दे यथा
अहोद्विजस्त्वद्विधिज्ञो वेदपारगः तो बयन्मृदुवस्त्राद्यैस्तुष्टमेनं प्रविसर्जयेत् अन्नहीनो दहेद्राष्ट्रम्म
न्त्रहीनश्च ऋत्विजः यजमानमदक्षिणो नास्ति यज्ञसमो रिपुः तत्रैव यथा समन्वितं यन्त्रे यन्त्रे राष्ट्र
न्ति हन्यते एवं समुच्छिन्न द्वारे रथी शीघ्रं शान्त्या विनश्यति अहिंसकस्य दान्तस्य धर्मार्जितधनस्य च नि
त्यश्च नियमस्थस्य सदा सानुग्रहा ग्रहाः ग्रहा गावो नरेन्द्राश्च ब्राह्मणाश्च विशेषतः पूजिताः प्रजय
न्त्येते निर्दहन्त्यपमानिताः ग्रहाणामिदमातिथ्यं कुर्यात्संवत्सरादपि आरोग्यबलसंपन्नो जीवेच्च
शरदां शतम् मात्स्ये एवं सम्यग्गान्तिः पापघ्नः सर्वान्देवान्विसर्जयेत् तत्र मन्त्रः यान्तु देवगणास्सर्वे
वे पूजामादाय पार्थिवीम् इष्टकामप्रदानार्थं पुनरागमनाय च भविष्योत्तरे तन्त्रस्समाप्ते जङ्गे तु का
रयेत्तु महोत्सवम् शङ्खतूर्यनिनादेन ब्रह्मघोषरवेण च मात्स्ये अनेन विधिना यस्तु ग्रहपूजां स
मारभेत् सर्वान्कामानवाप्नोति प्रेत्य स्वर्गे महीयते सदैवायुतहोमायं नवग्रहमखस्मृतः विवा

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मात्स्ये हरणीकृतिश्च मूर्द्धानन्दिवदन्यभिघारयेत् अत्र भिन्नशाखागनेकादशशाखादशशाकयानभेदेप्येवं द्राष्ट्ये
कयवदनेकमन्त्रयुक्तायाः अनेकस्मृत्युक्ता अपि हरणीकृतेरेकत्वान्मन्त्राणाम्विकल्पः उपांशुयाजवद्वशा
खाभेदभिन्नानामाज्यानुवाक्यानां समुच्चयेनानुपठन्ति वसोर्धारान्वयुतहोमे नास्ति प्रमाणाभावात् न
तः शुक्लाम्बरधरः शुक्लगन्धानुलेपनः सर्वौषधैस्सर्वगन्धैस्स्नापितो वेदपुङ्गवैः यजमानस्सपत्नीकश्च
त्विजस्तान्समाहितः दक्षिणाभिः प्रयत्नेन पूजयेज्जनविस्मयैः सूर्य्याय कपिलां धेनुं दद्याच्छङ्खं चन्द्र
थेन्द्रवे रक्तन्धुरन्धरं दद्याद्भौमाय कुद्दालिकम् बुधाय जातरूपन्तु गुरवे पीतवाससी श्वेताश्वन्दै
त्यगुरवे कृष्णाङ्गामर्कसूनवे आयसं राहवे दद्यात्केतवे छागमुत्तमम् सुवर्णेन समाः कार्य्या यज
मानेन दक्षिणा बुधप्रीत्यर्थं देहे पत्नी सह सर्वा मूल्यतः समा शतकपिते अस्मिन्पक्षे षोडशमाषाव
शिष्टहेमवाधिसुवर्णपद्मासामर्जस्यापत्तेस्तादृशसुवर्णमूल्यं प्रत्येकमिति परे वैकल्प्य मूल्यं पुनर्यथा
हेमापि देयम् यथा सर्वाः प्रत्येकं दशमाषसुवर्णेन समा भवन्तीति तु सम्यक् सर्वेषामथवा गावो
गुरुर्वीर्येणानुब्यति स्वमन्त्रेण प्रदातव्यास्सर्वे सर्वत्र दक्षिणाः स्कान्दे केतवे छागमासन्वा सर्वेषामेव
काञ्चनमिति तत्रैव यस्तु षोडशकरोति नित्यं स्वल्पवित्तस्य वा ग्रहः तमेव पूजयेद्भक्त्या दक्षिणाभिः स्व॰

शां·म·
१८

प्रथमोयुतहोमस्यात्लक्षहोमो द्वितीयकः तृतीयः कोटिहोमस्स्यात्त्रिविधोग्रहयज्ञकः एकरात्रं त्रिरात्रं वा पं
चरात्रमथापि वा शिवगाथाद्विदिमुगाथां शान्तिब्राह्मणभोजने समापयेत्प्रतिदिनं एवं भक्तिसमन्वितः इति वा
शिष्ठेप्येकरात्रादिग्रहणान्नियमानादरार्थम् अत्र सूक्तादिजपोपि तुलादानवदिति केचित् वाशिष्ठे अथा
भिषेकमंत्रेणाथामन्वायुलगीतकैः पूर्णकुंभेन तेनैव होमांते भागुरुः स्मुखेः अव्यङ्गावयवैर्ब्रह्मन्हेमसूत्रग्दाम
भूषितैः यजमानस्य कर्तव्यं चतुर्भिः स्नापनं बुधैः अभिषेकमन्त्राः प्रयोगे वक्ष्यन्ते वशिष्ठः स्वस्तिकं कु
र्यात् अभिषेकं ततः कुर्युः साचार्य्याः षोडशर्त्विजः विविधैर्मङ्गलैर्वाद्यैः सूतमागधजैस्सह ततस्तस्याभिषिक्त
स्य रक्षार्थं बलिमुत्क्षिपेत् दिग्विदिक्षु विचित्रान्नैर्दीपैर्नीराजयेत्ततः शुक्लमाल्याम्बरधरः शुक्लमाल्यानु
लेपनः ततो मण्डपमागत्य ध्यायेदग्निग्रहान्सुरान् प्रत्येकं प्रति मन्त्रैश्च दद्यात्पुष्पाञ्जलिं ततः इति
वामनः आचार्यप्रभृतिभ्यश्च ग्रहत्वेन फलं ततः समिदाज्यचरूणाञ्च तिलहोमफलं च यत् प्रभाले
कुम्भपूजायाश्चाशुनस्य फलं च यत् गणपक्षेत्रपालानां दुर्गादिव्यङ्गदेवताः तासां जपफलं सम्पूर्णं भ
यात्तु लपूर्वके एतानि वचामृतवचांसि निर्मूला नीति पितामहचरणाः वाशिष्ठगोभिलवचसामपि कवि
हाङ्कः वशिष्ठः ततो जपादनुज्ञया पूर्णाहुतिमथाचरेत् तत्रैव मंत्रेण सम्भ्रमेत अग्नेति पूर्णाहु
तिश्चरेत् अग्निपुराणे मूर्धानन्दिवमन्त्रेण संस्रवेणाच धारयेत् दद्याद्धौयपूर्णावैनोपविश्यकं दत्वा

ग्र·मः
१८

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

यवादिभिरन्यतमद्रव्येणाग्रहादिभ्यः प्रत्येकं दशाहुतीस्तत्तन्मंत्रैर्हुत्वा तेनैवद्रव्येणाव्यस्तसमस्तव्याहृतिरयुत
लक्षकोट्यन्यतमसंख्यया जुहुयादिति हेमाद्रिमाद्रिमदनो तानि च द्रव्याणि देवीपुराणे यवव्रीहिघृतक्षीर
तिलकंगुप्रसातिकाः पङ्कजाशीरविल्वार्कदलाहोमेप्रकीर्त्तिताः उदङ्मुखाः प्राङ्मुखा वा कुर्युर्ग्रहलग्ना
पुङ्गवाः मंत्रवन्तश्चक मंत्रवन्तश्चकर्त्तव्याचरुर्वैः प्रतिदैवतम् हुत्वा तांश्च सूत्रसम्यक ततो होमं समारभेत्
५५ चर्वादिकं घृतेनाभ्यक्तं होतव्यम् होतव्यश्च घृतेनाघृक्तं चरुभक्ष्यादिकं घृतेनेति मात्स्यात् भक्ष्यं द्राक्षादि चरु
नैवेद्यघृतशिवौ गुडोदनादिः तानि द्रव्याणयुक्ता इत्येतानि हवींषि स्युः समित्संख्यासमाहुती रित्याश्व
लायनोक्तेः अधिदेवतादिभ्योपि होमो हेमाद्रौ चरुणा च समिद्भिश्च सर्पिषा च तिलैः क्रमात् तत्तन्मंत्रै
श्च होतव्याः क्रमादन्वाधिदेवताः गृह्यपरिशिष्टे प्रधानदशांशेन पार्श्वदेवयोरिति अधिदेवतादिहोमस
ख्यावशिष्टद्वित्राश्चैवाधिदेवत्याः पश्चानां चैव पञ्चधेति द्वित्राः पञ्चधा प्रत्येकमित्यर्थः केचित्तु
होत्रयोवाद्वित्राः विनायकादीनामपञ्चधा एकैकामिति केचित्तु प्रयोगपारिजाते इन्द्रादिलोकपालाश्च
तत्तन्मंत्रैः प्रपूजयेत् तत्तन्मंत्रैर्उपकुर्यात्ततो होमं समारभेत् नृसिंहपुराणे ततो व्याहृतिभिः पश्चा
ज्जुहुयाच्च तिलादिकम् यावत्प्रपूर्णेतिसंख्यालक्षं वाधिरन्त्रवा वाशब्दादयुतमपि ग्रहयज्ञश्चनानि
यकालीनः स्वेच्छाजन्तः स उच्यते इति भविष्योत्तरात् ततो व्याहृतिभिः कुर्यात्तिलहोमम प्रयत्नतः ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां०म० नमोस्तु सर्प्पेभ्य इति सर्प्पीणाम्मन्त्र उच्यते एवं ब्रह्मापक्मत्विज इति ब्रह्मणायुदाहृतः विनायकस्य चानूनद
२७ निमन्त्रो बुधैः स्मृतः जातवेदसे सुनवाम दुर्गामन्त्रो त्र उच्यते दुर्गा कुर्ति श्च मूर्द्धानं दिव इत्यभिपातयेत्
स्वाहे नैवेद्य शेषं कृत्वा च होमं मंत्रादनन्तरम् अथ व्याहृतिभिर्हुत्वा एकैकस्य यथाक्रमम् अष्टोत्तर
श्च सा सहस्त्र शतमष्टाधिकं तथा अष्टाविंशतिरष्टौ वा एकैकस्य च होमयेत् होतव्यं श्च घृतं तत्र चरुं ला
जादिकं पुनः मन्त्रैर्दशांशकं तीर्त्वा होमो व्याहृतिभिः स्मृतः अथेति अथर्ववेदार्थः गृहीत्वा तामथा
न्विकामिति वत् मदनेस्त्वयवेत्येव पपाठ तत्तन्मन्त्राणां व्याहृतीनां च परस्परं विकल्पः अष्टोत्त
र सहस्त्रादि संख्यानुपक्षद्वयेपि नैवेद्य शेष होमस्तु शाखाविशेषपरः इत्यपि स एव लक्षादिकः पु
नर्व्याहृतिभिर्होमो मन्त्रैर्दशांशकं तीर्त्वा स्मृत इत्यन्वयः मन्त्रैर्ग्रहमंत्रैर्व्याहृतिभिर्व्यस्ताभि
श्च तानेव ग्रहणात्तु अथ व्याहृतिभिर्हुत्वेति एतद्वाक्यम् एकैकस्येति तु प्रति दैवतमष्टादिसं
ख्यान्वयार्थम् एकैकस्य तु होमयेदित्येकैकपदं तु चर्वादिद्रव्यपरम् न देवतापरम् अस्मिन्नेव
होमे घृतचरू विधिरये लक्षादिक इत्येतत्तु अथ व्याहृतिभिर्हुत्वेति विहितहोमे लक्षादिसं
ख्याविध्यर्थम् मंत्रैरित्यादि तु चरुहोमोत्तरं सोमं राजानमितिमन्त्रेण यथा प्रकृतिस्विष्टकृ
त्वा सूर्यादिमन्त्रैर्दशदशांशं कृत्वा प्रतिदैवतं लक्षहोमादिद्रव्येण कृत्वा व्याहृतिभिर्लक्षा रामः
२७

न४

द गोकुलात् मृद्‌माणीय विप्रेन्द्र सर्वौषधिसमन्वितम् तत्र यजमानस्य धर्म्मवित् याज्ञवल्क्यः अर्कः पला
शः खदिरः अपामार्गः पिप्पलः उदुम्बरः शमी दूर्वा कुशाश्च समिधः क्रमात् ईश्वरादिदेवानां स्वस्वमन्त्रै
रेव होमः हेमाद्रौ देवीपुराणे गणाधिपतये देया प्रथमा तु वराहुतिः अन्यथा विफला विप्र भवतीह न संश
यः इति आश्वलायनः जुहुयात् समिधा येन स्वस्वमन्त्रैर्यथाक्रमम् इति समित्सु विशेषमाह याज्ञवल्क्यः
होतव्या मधुसर्पिभ्यां दध्ना क्षीरेण वा युता इति नवान्न समप्रति यत्र देवता कानि क द्रव्याणि आमेकैवाहुतिः
मैत्रायणीय वदिति वाच्यम् आदौ तु समिदाज्यैः पृथगष्टोत्तरशतमिति वशिष्ठात् अन्यत्रापि सर्वत्र
यत्र देवताके स्मार्त्ते कर्म्मण्यनेकद्रव्यके पृथगेव होमः सम्प्रदायिकाः बहुषु कर्म्मसु प्रायो वचनान्य
थैवारुकादि आकृष्णेन सह स्त्रांशोरिमं देवा तथेदं वे अग्निर्मूर्द्धेति भौमाय उद्बुध्यस्वेति बुधाय बृह
ष७ स्पते इति गुरोः शुक्राय अन्नात् परिस्रुतः शनैश्चरस्य मन्त्रो यं शन्नो देवी रुदाहृतः कयानश्चित्र इति राहु केतु नै७
कृण्वन्निति केतवे मात्स्ये आवो राजेति रुद्रस्य बलिहोमं समाचरेत् आपो हि ष्ठेत्युमायास्तु स्योनेति स्वा
मिनस्तथा विष्णोरराटेति विष्णुरित्यमितस्वयम्भुवः इदमापः प्रवहतेत्यिन्द्रस्य प्रकीर्त्तितः तथा य
मस्य चायं गौरिति होमः प्रकीर्त्तितः कालस्य ब्रह्म जज्ञानमिति मन्त्रः प्रकीर्त्तितः चित्रगुप्तस्य चाज्ञाने
मिति पौराणिका विदुः अग्निं दूतं वृणीमहे इति वह्नेरुदाहृतः उदुत्तमं वरुणेति अयं मन्त्रः प्रकी
र्त्तितः भूमेः पृथिव्यन्तरिक्षमिति वेदेषु पठ्यते सहस्रशीर्षा पुरुष इति विष्णुरुदाहृतः इन्द्रायेन्द्रो
मरुत्वते इति शक्रस्य शस्यते उत्तानपर्णा सुभग इति शच्याः समाचरेत् प्रजापतेः पुनर्होमं प्रजापत इति

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

तत्रैव दिवाकरकुजाभ्यां हि दीपयेद्रक्तचंदनम् चंद्रे च भार्गवे चैव सितवर्णं प्रदापयेत् कुंकुमेन तु
संयुक्तं चन्दनं जीवसौम्ययोः अगरुं चंदनं दद्याद्राहुकेत्वर्कजेषु च ग्रहयज्ञनिबन्धादिति ग्रा
यश्चाधूपमादहेत् रवेः कुन्दुरुकं धूपं शशिनस्तु घृताक्षताः भौमस्य तु रसश्चैव अगरुश्च बुधे स्मृ
तम् सिह्लकं गुरवे दद्याच्छुक्रे बिल्वागुरुस्तथा गुग्गुलुर्मन्दवारे तु लाक्षा राहोश्च केतवे कुन्दुरु
कः सल्लकीनिर्य्यासः सिह्लकं सिह्ला इति मध्यदेशप्रसिद्धम् विल्वागुरुः विल्वफलनिर्य्यासहितं स५
मगरुम् मन्दवारः मन्दवारश्चन्द्रानि उद्दीपस्वेति मंत्रेण दीपं दद्यात् द्वितः विहितगंधधूपादीनाम
संभवे तु याज्ञवल्क्यः गुडौदनं हविष्यं पायसं मधुक्षीरष्याष्टिकं दध्योदनम् हविश्चिषूर्णं मांसं
चित्रान्नमेव च दद्याद्ग्रहक्रमादेतद्द्विजेभ्यो पिजनावुधः शक्तितो वा यथालाभं सत्कृत्य विधिपू
र्वकम् वशिष्ठः उपचाराणि सर्वे पठन्नपि कोक्षतैः सदा गंधाभावे तु कुंकुमं गंधम् पुष्पाभावे सु
गन्धकम् धूपाभावे गुग्गुलं स्याज्ज्याभावे तु मिश्रकम् पञ्चाम्नं तं गवामेव मिश्रकं न क
दाचनेति मात्स्ये प्रागुत्तरे तस्मात् दध्यक्षताव भूषिते चूतपल्लवसंयुक्तं फलवस्त्रयु
गान्वितम् पञ्चरत्नसमायुक्तं पञ्चभंगयुतं तथा स्थापयेद्व्रणाकुंभं वरुणं तत्र विन्य शां.म.
सेत् गङ्गाद्यास्सरितस्सर्वाः समुद्राश्च सरांसि च गजाश्वरथ्यावल्मीकसङ्गमाद् १६

क्षिणतो वा अधिदैवतमे प्रत्यधिदेवताः स्थापनीयाः प्रयत्नेन व्याहृतिभिः पृथक् पृथक् तत्रैव वाशिष्टीयेत्तु
देवतानां स्थानानन्तरं चोत्तमम् रुद्रं त्र्यम्बकमन्त्रेण रवेरुत्तरतो न्यसेत् सोमस्याग्नेयदिग्भागे श्रीश्वतेमेनकाग्नि
जा यद्क्रन्देति भौमस्य स्कन्दयाम्प्रदापयेत् विष्णुं विष्णोरराटेनु यजेत्पूर्वे बुधस्यतु गुरोरुत्तरतोऽप्य
र्च्यो ब्रह्मा ब्रह्मेति मन्त्रतः सजोषा इन्द्रेति शुक्रस्य प्राच्यां शक्रन्निधापयेत् शनेः पश्चिमतः स्थाप्यो यमाय
त्वेति चायमः काद्दिमेरसीति मन्त्रेण राहोः शालन्तयोत्तरे चित्रगुप्तञ्च केतूनां त्विवा च क्षितिनेत्रीते प्र
त्यग्नेश्च देवताः स्थाप्याः स्वस्थानाधिदेवताः अग्निरापो धरा विष्णुरिन्द्राणी च प्रजापतिः सर्पा ब्रह्मा च
निर्दिष्टा अधिदेवा यथाक्रमम् ग्रहदेवतयोर्मध्ये अधिदेवान्निवेशयेत् एतानि ववाविष्टायवचोसिके
श्चिन्नाद्रियन्ते पारिजाते पद्मप्राग्दलमारभ्य दलाग्रेणुक्रमान्न्यसेत् इन्द्रादिलोकपालांश्च तत्तन्मन्त्रैः
प्रपूजयेत् विनायकन्तथा दुर्गां वायुमाकाशमेव च आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारको एते
च विनायकाद्याः पञ्च ग्रहेभ्य उत्तरतः स्थाप्याः इति सा प्रदीपिका: दक्षिणपश्चिमवायव्यान्तरतोऽपृ
वेंशुयथाक्रममित्यन्ये राहुमंदप्रदिनेशानामुत्तरस्थाय यथाक्रमम् गणेशो दुर्गा वायुश्च राहुकेत्वोश्च
पश्चिमे आकाशमश्विनौ चेति पञ्चैतान्स्थापयेद्बुधः इति संग्रहानुसारेणोकेतुयुरुणामध्य इति फ
लितोर्थः विनायकपदमुपलक्षणम् तेन दुर्गादयोयत्रैव स्थाप्या इति केचित् चन्दनादिनियम

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां०म० २५ विधावस्तु केशवो विधीयते शनैश्चरयमं विद्याद्राहोः कालं तथैव च चित्रगुप्तोऽधिपः केतोरित्येता ग्रहदे
वताः ॥ देवेनिधिर्ब्रह्मा तत्रैव वक्ष्येस्थानानि देवानामीश्वरादियथाक्रमम् सूर्यस्येवोत्तरेशम्भुमुमां सोम
स्य दक्षिणे स्कंदमंगारकस्यैव दक्षिणस्यां निवेशयेत् सौम्यात्पश्चिमतो विष्णुर्ब्रह्मा जीवस्य पूर्वतः इंद्र
मे च्चासितादिमंदस्यापवेषतोयमं राहोः पूर्वोत्तरे कालं सर्वभूतभयावहम् केतोर्नैरृतिदिग्भागे चित्रगुप्त
निधापयेत् स्कांदे अतः स्थापनमंत्राश्च कथयाम्यनुपूर्वतः ईश्वरं त्र्यंबकं चैति श्रीश्चते चति पार्वतीम्
यदक्रन्देति च स्कंदं विष्णुर्विष्णो रराटमिति आब्रह्मेति ब्रह्माणं सजोषेंद्रेति वासवम् यमाय त्वेति च यमं
कालं कार्षिरसीति च चित्रावार्षितिमंत्रेण चित्रगुप्तं निधापयेत् अग्निरापः क्षितिर्विष्णुरिंद्रश्चै
न्द्री प्रजापतिः सर्पा ब्रह्मा च निर्दिष्टा अधिदेवा यथाक्रमम् अग्निं दूतमिति त्वग्नेर्वरुणस्य तदुत्तम
म् स्योना पृथिवीति मेदिन्याः इदं विष्णुस्तु विष्णवे इंद्रायेंद्रो इंद्रीं द्रप्सोऽजानपरीणश्चाचीस्थितो प्रजापतेः
मजेशस्य एवब्रह्मेति वै विधोः मंत्रो नमोऽस्तु सर्पेभ्यः सर्पाणां स्थापने मतः ग्रहदेवाधिदेवानां नैवेद्य
कुसुमानि च ग्रहवस्त्रानं दानं तु स्थापनं चानुपूर्वशः अत्र सूर्यादयो ग्रहा ईश्वरादयो देवाः अग्न्या
दयो अधिदेवताः ईश्वरादिदेवानाम् सूर्यस्येवोत्तरेशम्भुमित्यादिना पूर्वस्थली मुक्तानि अग्न्याद शा०म० २५
धिदेवा अधिदेवतात्वेन व्यवहृताः अग्न्यादयस्तु प्रत्यधिदेवतात्वेन तेषां स्थानानंतरं चोक्तमधिदेवाद

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

ष्टमधिदेवेनेन्द्रसहितं पीतदीर्घचतुरस्रमण्डले उदङ्मुखं गुरुमावाहयामि किरीटिनमिन्द्रनीलसमद्युतिं शूल
धरं वरदं गृध्रवाहनं सबाणबाणासनधरं सौराष्ट्रदेशजं भग्वार्षं गायत्रीछन्दसं कृष्णमाल्यवरधरं कृष्णमाभ
रणभूषितं कृष्णगन्धानुलेपनं कृष्णध्वजपताकिनं केयूरमणिशोभितं मारुह्य रथं दिव्यं मेरुं प्रदक्षि
णीकुर्वाणं ग्रहमण्डले प्रविष्टमधिदेवताप्रजापतिसहितं प्रत्यधिदेवतायमसहितं कृष्णं धनुर्मण्डले
प्रत्यङ्मुखं रवेःपुत्रं शनैश्चरमावाहयामि किरीटिनं करालवदनं खड्गचर्मशूलधरं सिंहासनस्थं पूर्वदेशजं
पाठलिगोत्रमाङ्गिरसार्षमनुष्टुप्छन्दसं कृष्णमाल्यवरधरं कृष्णमाभरणभूषितं कृष्णगन्धानुलेपनं कृष्णध्व
जपताकिनं मुकुटकेयूरमणिशोभितं मारुह्य रथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमण्डले प्रविष्टमधि
देवताकालसहितं कृष्णसर्पमण्डले दक्षिणमुखं राहुमावाहयामि धूम्रान्द्विबाहून्पाशधरान् विकृ
ताननान् गृध्रवाहनान् किरीटिनो मध्यदेशजान् जैमिनिगोत्रजान् गौतमार्षान् नानाछन्दसश्चित्रा
म्बरधरान् चित्राभरणभूषितान् चित्रगन्धानुलेपनान् कृष्णपिङ्गध्वजपताकिनो मुकुटकेयूरमणिशो
भितानारुह्य रथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणान् ग्रहमण्डले प्रविष्टान् अधिदेवताब्रह्मसहितान् प्र
त्यधिदेवताचित्रगुप्तसहितान् कृष्णपिङ्गध्वजमण्डले दक्षिणमुखान् केतूनावाहयामि स्वादि ई
श्वरं भास्करो विघ्नादुमा विघ्नाग्निशशाकर स्कन्दमंगारके विघ्नाद्बुधेनारायणं विद्धि गुरौ वेदनिधिं

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां·म· णीकुर्वाणंग्रहमंडलप्रविष्टमधिदेवतेंद्राणीसहितंप्रत्यधिदेवेंद्रसहितंशुक्लंपंचकोणमण्डलेप्राङ्मुखं
२४ भार्गवंतंशुक्रमावाहयामि किरीटिनंश्वेतांवरधरंदशाश्वश्वेतभूषणंपाशपाणिंद्विबाहुंवनायुदेशज
मंत्रिगोत्रमात्रेयार्षमनुष्टुप्छंदसंश्वेतांवरधरंश्वेताभरणभूषितंश्वेतगंधानुलेपनंश्वेतच्छत्रप
ताकिनंमुकुटकेयूरमणिशोभितमारूढरथन्दिव्यमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडलेप्रविष्टम
धिदेवताभूसहितेचतुरस्रमण्डलेप्रत्यङ्मुखंसोममावाहयामि किरीटिनंपीतमाल्यांवरधरंपी
तवर्णंकर्णिकारसमद्युतिंखड्गचर्मगदापाणिंसिंहस्थंवरदंमगधदेशजंमत्रिगोत्रंजभरद्वाजा
र्षंजंवृहतीछंदसंपीतांवरधरंपीताभरणभूषितंपीतगंधानुलेपनंपीतच्छत्रध्वजपताकिनं
मुकुटकेयूरमणिशोभितमारूढरथंदिव्यमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडलेप्रविष्टमधिदेवता
धि ४ विष्णुसहितंप्रत्यधिदेवताविष्णुसहितंपीतवाणमण्डलेदक्षिणामुखंबुधमावाहयामि किरीटि
नंपीतवर्णंचतुर्भुजंदंडिनंवरदंसाक्षसूत्रकमण्डलुंसिंधुदेशजंमांगिरसगोत्रंवाशिष्ठा
र्षमनुष्टुप्छंदसंपीतांवरधरंपीताभरणभूषितंपीतगंधानुलेपनंपीतच्छत्रध्वजपता । राम:
किनंमुकुटकेयूरमणिशोभितमारूढरथंदिव्यमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडलेप्रवि २७

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

भूर्भुवः स्वः स्मृतम्परम् चतुर्थ्यानामसंयुक्तंनमस्कारान्तयोजितम् एषमंत्रःसमाख्यातोग्रहपूजाविधा
यकः अनेनावाहनंकुर्यादनेनैवविसर्जनमितिसूत्रे अत्रावाहनवाक्येषुविशेषमाहबौधायनः किरी
टिनम्पद्मासनम्पद्मकरंपद्मगर्भसमद्युतिः सप्ताश्वंसप्तरज्जुंकलिङ्गदेशजंकाश्यपगोत्रंविश्वामित्रार्ष
त्रिष्टुप्छन्दसंरक्तांबरधरंरक्ताभरणभूषितम् रक्तगंधानुलेपनंरक्तछत्रध्वजपताकोपशोभितं मुकु
टकेयूरमणिशोभितम् आरुह्यरथन्दिव्यंमेरुंप्रदक्षिणीकुर्वाणग्रहमण्डलप्रविष्टमधिदेवताग्निसहि
तंप्रत्यधिदेवतेश्वरसहितंरक्तवर्त्तमण्डलेपूर्वमुखमादित्यमावाहयामि किरीटिनंरक्तमाल्यांवरंरक्त
शूलगदाधरं चतुर्भुजंमेषगमनमवंतिदेशजंवाशिष्ठगोत्रजंजमदग्न्यार्षंजगतीछंदसंरक्तांवरधरंर
क्ताभरणभूषितंरक्तमाल्यानुलेपनंरक्तध्वजपताकिनंकिरीटिनंमुकुटकेयूरशोभितमारुह्याश्वदिव्यं मणि ८
मेरुम्प्रदक्षिणीकुर्वाणंग्रहमण्डलेप्रविष्टमधिदेवताभूमिसहितंप्रत्यधिदेवतास्कंदसहितंत्रिकोण
रक्तमण्डलेदक्षिणाभिमुखमङ्गारकमावाहयामि किरीटिनंश्वेतवर्णंचतुर्भुजन्दण्डिनम्वरदक्षामम्
मासूत्रकमण्डलुंकीकटदेशजंभार्गवगोत्रजंशौनकार्षंपंक्तिछंदसंश्वेताम्बरधरंश्वेताभरणभूषि
तंश्वेतगंधानुलेपनंश्वेतध्वजछत्रपताकिनंमुकुटकेयूरमणिशोभितमारुह्यरथन्दिव्यम्मेरुंप्रदक्षि

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां॰म॰ खत्वेनविकल्पते यत्तुहेमाद्रिर्विकल्पपरिजिहीर्षयाप्राङ्मुखानिन्द्रादीउदङ्मुखोवामदक्षोप्रत्यङ्मुखो
१३ दक्षिः दक्षिणातोमुखाः दक्षिणस्यहृद्यदीतिव्याचष्ट तन्नमूलंचिन्त्यम् विरोधतोऽव्यवस्थापत्तेश्च वर्णरूपगुणो
र्युक्तानूव्याहृत्यावाहयेत्तुतान् मात्स्ये पुराणेऽपि विप्रकल्पितेकृत्वाब्राह्मणवाचनम् अग्निप्रणयनंकृ
त्वावेद्यामावाहयेत्सुरान् देवानांतत्रसंस्थाप्याविंशतिर्द्वादशाधिका आदित्याभिमुखास्सर्वेसाधि
प्रत्यधिदेवताः विष्णुधर्म्मोत्तरे अतःपरंप्रवक्ष्यामियोदेवोयोग्रहःस्मृतः अपिरर्कःस्मृतःसो
मोवरुणःपरिकीर्त्तितः अङ्गारकःकुमारश्चबुधश्चभगवान्हरिः बृहस्पतिःस्मृतःशुक्रःशु
क्रोदेवीचपार्वती प्रजापतिःशनिश्चैवराहुर्योगणाधिपः विश्वकर्म्मास्मृतःकेतुर्य्यग्रहास्तेसुराः
स्मृताः अतएवाग्न्यादिलिङ्गकामंत्राः सूर्य्यादिस्थापनउक्ताः स्कान्दे आग्निदूतंदिनेशायसूर्य्या
याप्सन्तत्यपि स्योनापृथिवीभौमाय इदंविष्णुर्बुधाय इन्द्रआसांसुरेज्याय शुक्रंज्योतिःसिताय
प्रजापतेतिसौराय आयंगौरितिराहवे केतवेब्रह्मयज्ञानंस्वैःस्वैर्मंत्रैःप्रतिष्ठिताः एतेषाञ्चमन्त्रा
णांव्याहृत्यावाहयेत्तुतानितिसुन्दाभिर्व्याहृतिभिरावाहनेविकल्पः मदनस्तु आवाहनस्थापनयो राम॰
र्वैदिकव्याहृतिभिरावाहनम् एतैर्मंत्रैःस्थापनमित्यूचे पारिजाते वामनस्तु प्रणवत्वादितःकृत्वा १३

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

कोटिहोमे शिवो वह्निस्सर्वकामप्रदायकः काचित्तु लक्षहोमे तु वह्निः स्यात्कोटिहोमे कृनाशन इति स्कान्दे भास्क-
राङ्गारकौ रक्तौ श्वेतौ शुक्रनिशाकरौ सोमपुत्रो गुरुश्चैव तावुभौ पीतकौ स्मृतौ कृष्णं शनैश्चरं विन्द्याद्राहुञ्च वि-
त्राश्च केतवः मध्ये तु भास्करं विद्याच्छशिनं पूर्वदक्षिणे दक्षिणे लोहितं विद्याद्बुधं पूर्वोत्तरेण तु उत्तरेण गु-
रुं विद्यात्पूर्वेणैव तु भार्गवम् पश्चिमे तु शनिं विद्याद्राहुं दक्षिणपश्चिमे पश्चिमोत्तरतः केतुः स्थाप्या वै
३५ शुक्लतण्डुलैः अथ वार्णिकैः कार्य्याः कार्य्याः स्वर्णादिधातुभिः याज्ञवल्क्यः ताम्रकात्स्फटिकाद्रक्तचं-
दनात्स्वर्णजावुभौ रजतादयसः सीसात्कांस्यात्कार्य्या ग्रहास्तथा वशिष्ठः यथारुचि प्रमाणेन प्रतिमा
कल्पयेत्सुधीः अत्र सर्वत्र यथास्थानं सूर्य्यादिः क्रमः स्पष्टः बौधायनस्तु सूर्य्याङ्गारकशुक्रचन्द्रबुधगु-
रुशनय इत्याह स्कान्दे भानुन्तु मण्डलाकारं सोमन्तु चतुरस्रकम् अङ्गारकं त्रिकोणञ्च बुधं बाणाकृ-
तिन्तथा चतुरस्रं गुरुं दीर्घं पञ्चास्रं भार्गवन्तथा धनुस्तुल्यं शनिं विद्याद्राहुं शूर्प्पाकृतिं तथा ध्वजाका-
रं केतवश्चैव गणेशान्तत्र रूपिणाम् रूपिणां हस्तपादाद्यवयवशुक्लं स्यात्पद्यच्छुक्लतण्डुलैः वर्णकैर्लेख्या
इत्येतत्सप्तयोर्म्मण्डलाद्याकारत्वेन इति हेमाद्रिः तत्रैव शुक्रार्कौ प्राङ्मुखौ प्रत्यङ्मुखः शनिः सोमः शेषा द-
क्षिणतोमुखाः इदञ्च शुक्रादीनां प्रत्यङ्मुखत्वादि आदित्याभिमुखाः सर्वे इति मात्स्योक्तादित्याभिमु-

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां॰म॰ मस्मिंश्चवर्णाःस्थानमुखानिच योज्ञात्वाकुरुशान्तिंस्वग्रहास्तेनावमानिताः तत्रवर्णाजन्मनीश्राह
१२ दामोदरीयेवृद्धपराशरः रक्तःकश्यपोभानुः शुक्लोब्रह्मसुतश्शशी रक्तोरुद्रसुतोभौमः पीतःसो
मसुतोबुधः पीताब्राह्मणस्सुराचार्यः शुक्लः शुक्रोभृगूद्वहः कृष्णश्शनिरवेःपुत्रः कृष्णोराहुःप्र
जापतेः कृष्णःकेतुःकृशानूत्यः पापास्त्वयाप्यमीस्कान्दे उत्पन्नोऽर्कःकलिङ्गेषुयमुनायाञ्च
चन्द्रमाः अङ्गारकस्त्ववन्त्यायांमगधायांहिमांशुजः सैंधवेषुगुरुर्जातश्शुक्रोभोजकटेत
था शनैश्चरस्तुसौराष्ट्रेराहुर्वैराटिनापुरे अन्तर्वेद्यांतथाकेतुरित्येताग्रहभूमयः यस्ययस्य
चयद्गोत्रंतत्तेवक्ष्याम्यनन्तरम् आदित्यःकाश्यपेगोत्रेआत्रेयश्चन्द्रमाभवेत् भरद्वाजोभवे
द्भौमः तथात्रेयश्चसोमजः शक्रपूज्योऽङ्गिरोगोत्रःशुक्रोवैभार्गवस्तथा शनिःकाश्यप
एवाथराहुःपैठीनसिस्तथा केतवोजैमिनीयाश्चग्रहाणिस्तदनन्तरम् आदित्योकपि
लोनामपिङ्गलस्सोमउच्यते धूम्रकेतुस्तथाभौमोजाठराग्निर्बुधःस्मृतः गुरोश्चैव
शिखीनामशुक्रोभवतिहाटकः शनैश्चरोमहातेजाराहुकेत्वोहुताशनः एतानिग्र
हविशेषतोग्निनामानि कर्मविशेषतोपि देवीपुराणे शुभोग्रहविधौप्यग्निर्लक्षहे रा॰म॰ १२

अरत्नुलोच्छ्रायसंयुक्तम्बप्रहुयमथोपरि द्व्यंगुलस्तत्रविस्तारस्सर्वेषाङ्कथितोबुधैः तत्रग्रहानाहयाज्ञवल्क्यः सूर्य्यः सोमोमहीपुत्रः सोमपुत्रोवृहस्पतिः शुक्रश्शनैश्चरोराहुः केतुश्चेतिग्रहाःस्मृताः स्कान्दे नवग्रहमखेविप्राश्चत्वारोवेदवादिनः अथवाऽत्विजोशान्तोद्वावेवश्रुतिकोविदौ द्वावेवायुतहोमेतुरप्रसक्तेनविस्तरइति त्रिविधमपिनवग्रहमुपक्रम्य वशिष्ठस्तु षोडशब्राह्मणान्शुद्धानदम्भान्तविवर्ज्जितान् तेषाम्मध्येश्रेष्ठतममाचार्य्यन्तम्प्रकल्पयेदिति अत्रपारिजाते नवाचार्य्याएकोब्रह्मावद्रुत्विजः आचार्य्योपनवभ्यश्चग्रहाश्चेनफलन्ततइत्युक्तेः आचार्य्यकर्म्मएकएवकुर्य्यात् परेतत्वारम्भमात्रम् धेन्वाद्याग्रहदक्षिणाअपिएवदेयाइत्याद्युक्तम् तदयुक्तम् उपक्रमेएकाचार्य्यश्रुतेः आचार्य्यश्रुतेराचार्य्यानाचार्य्यसमुदायेपरगवइत्युपदधातीतिवह्निसमावायमात्रेणानवभ्यइत्युपसंहारस्यपदोपपत्तेः उपक्रमेपि यद्यप्याचार्य्यस्यसंस्कार्य्यत्वेनैकत्वंविवक्षितम् तथाप्याचार्य्यस्यभूतंभाव्युपयोगाभावात्संस्कार्य्यत्वानुपपत्तेः अतएव आचार्य्यः स्वकर्म्मकुर्य्यादितिकल्पितेवाक्यनुपादेयत्वाच्चाचार्य्यस्यभवत्येकत्वम्विवक्षितमुपपादितवेदमध्वर्य्युवरणतिहोतारम्वरणीतपुरोहितंवरणीतइत्यत्रमित्रैः कौजन्मभूर्गोत्र

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

साध्यादि षड्योगान् विष्टिकरणम् भूरादिसप्तलोकान् अथर्ववेदम् वायव्ये ध्रुवं सप्तऋषींश्च, अथयथा
वकाशम् गंगादिसप्तसरितः सप्तकुलाचलान् अष्टौवसून् द्वादशादित्यान् एकादशरुद्रान् एकोनपञ्चा
शन्मरुतान् षोडशमातॄः षड्ऋतून् द्वादशमासान् द्वे अयने पञ्चदशतिथीन् सप्तवारान् षष्टिसंवत्सरा
न् सुपर्णान् नागान् सर्पान् यक्षान् गंधर्वान् विद्याधरान् अप्सरसः रक्षांसि भूतानि मनुष्यानिति
कोटिहोमेतु वेद्याः पूर्वभ्रस्रारणम् मध्येजनार्दनम् पश्चिमेरुद्रम् उत्तरेस्कन्दम् इत्येतान् अथावाहयेत्
ततोऽस्मिन्कर्म्मणि देवतापरिग्रहार्थमन्वाधानं करिष्ये· इति संकल्प्य· चतुर्थी आज्येनेत्यंतमुक्त्वा सू
र्यादीन् ग्रहान् समिदाज्यशेषचरुभिरष्टसहस्राष्टशताष्टाविंशत्यष्टान्यतमासंख्ययाधिदेवताप्र
त्यधिदेवताविनायकादीन्लोकपालांश्चामुकसंख्यया एतैरेवद्रव्यैः क्षेत्रपालादीं श्चामुकसंख्यया
सूर्याद्याः सर्वदेवताः दशसंख्याकतिलाहुतिभिः अग्निवायुसूर्य्यप्रजापतिमन्त्रमेकं पञ्चविंशति
शतमिताभिस्तिलाहुतिर्य्यक्षे लक्षहोमे पञ्चविंशतिसहस्राहुतिभिः कोटिहोमे पञ्चविंशति
लक्षमिताभिरितिविशेषः ततः शेषेणस्विष्टकृतमित्यादियक्ष्ये· इत्यन्तमुक्त्वा समिद्धयमाधाय
निर्वापादिक्रमेणागुडौदनादीन्नवान्यां श्चरुंश्चास्त्रपाविंशतिरितिद्वात्रिंशन्तुवेवावसृन् श्रपयित्वा
पञ्चभिः षोडशभिर्वोपचारैः संपूजयेत् तत्रवस्त्राणियथवर्णानि रविभौमयोरक्तचंदनम्

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां॰ म॰ चंद्रशुक्रयोः श्वेतचंदनम् बुधगुर्वोः कुंकुमयुतम् शनिराहुकेतूनां कृष्णागुरुपुष्पाणि तद्वद्वर्णानि
२७ धूपास्तु सल्लकीनिर्यासं घृतनाक्तपद्मासलमगरु शिलाजलकं बिल्वयुतागुरु गुग्गुलम् लाक्षालक्षाः
क्रमाज्ज्ञेयस्मा दत्त्वा उद्दीप्य स्वतिसर्वेभ्यो दीपान्दत्त्वा गुडौदनं पायसं नीवारौदनं क्षीरघृतषाष्टि
कौदनं दध्योदनं घृतोदनं तिलमाषघृतमोदनं मांसोदनं चित्रौदनं च क्रमान्निवेदयेत् अधिदेव
तादिभ्यस्तु वासोगंधपुष्पाणि श्वेतानि गुग्गुलधूपः नैवेद्यं पायसादि यथालाभं सूर्यादिद्वात्रिंश
तामन्त्रेण वाच्य सर्वबाह्वजापदार्थानुसमयनेव ततो वेदीशान्यां कलशं संस्थाप्य तत्र वरुणमावाह्य
स्य७ संपूज्याभिमंत्रयेत् तद्यथा कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः मूले तत्र स्थितो ब्रह्मा मध्ये मा
तृगणाः स्मृताः कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुंधरा ऋग्वेदोथ यजुर्वेदः सामवेदो ह्यथर्व
णः अंगैश्च सहितास्सर्वे कलशं तु समाश्रिताः अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा
आयांतु यजमानस्य दुरितक्षयकारकाः देवदानवसंवादे मथ्यमाने महोदधौ उत्पन्नोसि त
दा कुंभ विधृतो विष्णुना स्वयम् त्वत्तोये सर्वतीर्थानि देवाः सर्वदेवास्त्वयि स्थिताः त्वयि ति
ष्ठंति भूतानि त्वयि प्राणाः प्रतिष्ठिताः शिवस्स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः आदित्या वसवो रुद्राः राम:
विश्वेदेवाः सपैतृकाः त्वयि तिष्ठंति सर्वेपि यतः कामफलप्रदाः त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ३०

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा इति ततः फलपुष्पमालाशोभितं वितानं बृहस्पतिदैवतं सूर्यादिभ्य इदं
मम ते स्तु स्वस्त्य ग्रहवेद्युपरि बध्नीयात् ततस्त्वधीसाङ्नाघाज्यभागान्ते यजमानः सर्वा आवाहिताः सूर्यादिदेवताः
अग्निवायुसूर्यप्रजापतीन् आदिश्य समिदाज्यचरुतिलान् होतुमुत्सृजे न ममेति त्यजेत् तत ऋत्विजः समि
दाज्यनैवेद्यशेषचरून् क्रमेणावाहिताभ्यो देवताभ्यो बृहस्पत्याद्यन्यतमसंख्यया समस्तव्याहृतिभिर्वक्ष्यमा
णात् ततस्तन्मंत्रैर्वा कृत्वाहुतीः तिलैस्ताभ्य एव देवताभ्यः प्रत्येकं दशदशाहुतीः कृत्वा सोमं राजानमिति स्विष्ट
कृतं कृत्वा व्यस्तसमस्तव्याहृतिभिस्तिलैरयुतं लक्षं कोटिं वा जुहुयात् तत्र होमे ऋग्वेदिनस्तावदावाहनोक्ता
नेव मंत्रान् पठन्ति यजुर्वेदिनां तूच्यते आकृष्णेन हिरण्यस्तूपः सविता त्रिष्टुप् सूर्यप्रीतये तिलाज्यहोमे विनि
योगः ॐ आकृष्णेन रजसा० स्वाहा इदं सूर्याय एवं सर्वत्र इमं देवा वरुणः सोमो यजुः ०२ इमं देवा०
वो राजा २ अग्निर्मूर्धा विरूप आङ्गिरसो गायत्री ०३ उद्बुध्यस्व परमेष्ठी बुधस्त्रिष्टुप् ०४ बृहस्पते गृत्समदो बृहस्प
तिस्त्रिष्टुप् ०५ अन्नात्प्रजापतिः अश्विसरस्वतीन्द्राः शुक्रो जगती ६ शंनो दध्यङ्गाथर्वणः शान्तिर्गायत्री ०७
कया नो वामदेवो राहुर्गायत्री ०८ केतुं मधुच्छन्दाः केतवो गायत्री ०९ अथाधिदेवतानाम् त्र्यंबकं वसि
रुद्रो ष्ठो अनुष्टुप् ० १ अत्र मरणाणोदकस्पर्शात् श्रीश्च ते नारायण उमा त्रिष्टुप् ० २ यदक्रन्दो भास्कर जम
दग्निर्दीर्घतमाः स्कन्दस्त्रिष्टुप् ० ३ [illegible] यजुः ॐ विष्णो रराटमसि वेन्वा ० ४ आब्रह्मन्प्रजा

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां·म· पतिर्ब्रह्मायजुः आब्रह्मन्नल्पता ५ सयोवाविश्वामित्रइंद्रस्त्रिष्टुप्· सजोषाइन्द्रः ६ असियमोभास्करजम
३८ दग्निर्देवहितमसोयमस्त्रिष्टुप्· अत्रप्रणीतोदकस्पर्शनं कार्हम्भिरसिदध्यङ्ङाथर्वणः कालोऽनुष्टुप्· ८ अ
त्रापिप्रणीतोदकस्पर्शनं चित्रावसोऽत्रीषयाश्चित्रगुप्तोजगतीचित्रावसोःशीय· ९ अथप्रत्यधिदेवता
नाम् अग्निंदूतं· विरूपाग्निर्गायत्री· १ अश्वंनरबृहस्पतिः पुरउष्णिक्· २ स्योनामेधातिथिः पृथिवीगा
यत्री· ३ इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री· ४ त्रातारंगार्ग्यइंद्रस्त्रिष्टुप्· ५ अदित्यैदध्यङ्ङाथर्वण
इंद्राणीयजुः ६ आदित्येयम्नाः श्रीषाः प्रजापतेवरुणः प्रजापतिस्त्रिष्टुप्· ७ नमोस्तुदेवाःसर्प्पा
अनुष्टुप्· ८ ब्रह्मप्रजापतिर्ब्रह्मात्रिष्टुप्· ९ अथविनायकादिपञ्चानांगणानांत्वाप्रजापतिर्य
जुः गणानांत्वाममम १ अंबकप्रजापतिर्दुर्गानुष्टुप्· २ यातोवागंधर्वीवातउष्णिक्प्रमाणत
आवाहनेविनियुक्तानप्येतान् होमेपिपठंति तत्रग्रहाणामप्रमाणकाएव अन्येषान्तूच्यते आ
वारणजातंवामदेवोरुद्रस्त्रिष्टुप्· १ आपोहिष्ठाम्ब्रावरीषःसिंधुद्वीपउपमागायत्री स्योनामेधा
तिथिःस्कंदगायत्री· इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री· ४ त्वमित्सप्रथागोतमोब्रह्मावृहती· ५
इंद्रमिद्देवतातयउक्तासुगिंगिंद्रस्त्रिष्टुप्· ६ आयंगोःसार्प्पराज्ञीयमोगायत्री· ७ ब्रह्मजज्ञानंगो ए·म·
तमोवामदेवःकालस्त्रिष्टुप्· ८ यदाजाते कौशिकःचित्रगुप्तोनुष्टुप्· ९ अग्निंदूतंङ्गारावोःमेधा ३८

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

त्रिषिरग्निर्गायत्री १ उदुत्तमंकुत्सोनमोवामदेव आपस्त्रिष्टुप्. २ पृथिव्यांतरिक्षंविष्णुः पृथिवी उष्णि
क् ३ सहस्रशीर्षानारायणोविष्णुरनुष्टुप्. ४ इंद्रायेन्द्रोमरुत्वत. ५ उत्तानपर्णसुभगे. ६
प्रजापतेहिरण्यगर्भःप्रजापतिस्त्रिष्टुप्. ७ नमोस्तुसर्पेभ्योदेवाःसर्पाःअनुष्टुप्. ८ एषब्र
ह्माप्रजापतिर्ब्रह्माद्विपदीगायत्री ९ आनूनंरुद्रःकुसीदःकाण्वागणपतिर्गायत्री १ जातवे
दसेकश्यपोदुर्गात्रिष्टुप्. २ आदित्यवत्सआकाशोगायत्री ३ ऋतस्त्वात्रितोवायुरुष्णिक् ४ आ
काशादिभ्यस्तुस्थापनमंत्राएव होमबलावुक्थादिभ्यस्तुप्रणवाद्याःस्वाहांतानाममंत्राएव
लक्षकोटिहोमयोरिंद्रमित्रमित्यनेनगरुत्मद्धोमः कोटिहोमेतुब्रह्मजनार्दनरुद्रस्कंदेभ्योपि
नाममंत्रैर्होमः ततोयजमानमण्डपप्राग्द्वारकलशसमीपेत्रातारमिंद्रगर्गइंद्रस्त्रिष्टुप्इंद्रप्री
त्यर्थंवलिदानेविनियोगः त्रातारमिंद्र. इंद्रायसांगायसपरिवारायसायुधायसशक्तिकाया
मुंसदीपंमाषभक्तवलिंसमर्पयामिनमम इतिसदीपमाषभक्तवलिंदत्वा भोइंद्रदिशंरक्षवलिं
भक्षममसकुटुंबस्यायुःकर्ताक्षेमकर्ताशुभकर्ताशांतिकर्तापुष्टिकर्तातुष्टिकर्ताभवेतिप्रार्थ
येत् एवमाग्नेय्यादिषुहोमोत्ताग्न्यादिमंत्रैर्वलिदानंप्रार्थनञ्च एवमधिदेवताप्रत्यधिदे
वतासहितेभ्यःसूर्यादिग्रहेभ्योपिहोमोत्तेतत्तन्मंत्रैर्विनायकदुर्गावाय्वाऽऽकाशाश्विवास्तो

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां.म. ष्मतिक्षेत्राधिपतिभ्यस्तत्तन्मंत्रैर्होमो जेरेवैतत: आचार्यो यजमानान्वारब्धः स्रुचि स्रुवेण द्वादशवारंच
३९ तुर्वारं वा नारिकेलादिफलसंयुक्ताज्यं गृहीत्वा पूर्णाहुतिं जुहुयात् तत्र मंत्राः समुद्रादूर्म्मिरि
त्यृचस्य गौतमो वामदेवोग्निस्त्रिष्टुप् पूर्णाहुतौ विनियोगः एवमग्रेपि विनियोगः मूर्द्धानंदिवो भरद्वा
जो वैश्वानरो यवसुरुद्रादित्येभ्यः शतक्रतवे सप्तवतेऽग्नये ऽग्नस्व नममेति त्यजेत् कातीयानांतु मू
र्द्धानंदिव इत्येव पूर्णाहुति मंत्राः अग्नये इदं न ममेति त्यागः सामगानांतु एतंहोममित्यस्य प्रजा
पतिरृषिर्गायत्री छंदः इंद्रो देवता यशस्कामस्य यजनीयप्रयोगे विनियोगः एतं होमं यशसा
जुहोमि यो स्मै जुहोति वरमस्मै ददाति वरं तेन यशसा भामि लोके स्वाहा इत्यनेन स्रुवेणैव होमः
इंद्रायेदं न ममेति त्यागः ततो वसोर्द्धारया होष्यामीति संकल्प्य यजमानो वसोर्द्धारां जुहुयात्
मंत्रास्तु अग्निमील इति नवानां मधुच्छंदा अग्निर्गायत्री वसोर्द्धारायां विनियोगः विष्णोर्नु
कामिति वसिष्ठो दीर्घतमा विष्णुस्त्रिष्टुप् आत्ते पितरिति पञ्चदशानां गृत्समद ऋषिस्त्रिष्टुप्
स्वाहादिव्येति नवानां मधुच्छंदा एवामनसोमो गायत्री महावैश्वानरसाम्नो महावैश्वा
नर ऋषिर्वैश्वानरो देवता पथ्याबृहती छंदः ज्येष्ठसाम्नो भरद्वाज ऋषिर्वैश्वानरो देव शां.म:
तात्रिष्टुप् छंदः वसोर्द्धारायां विनियोगः वसोर्द्धारां जुहोतीत्यनुवाकानपि पठंति शिष्टाः ॥ ३९
एवं वसोर्द्धारां कृत्वा पूर्णपात्रविमोकादि च यथाशाखं समाप्याचार्यसहितान् ऋत्विजः सर्वौषधीभिरनुलि

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

ग्रां गं पत्नीपुत्रादिसहितं यजमानं स्वस्वशाखीयैर्मन्त्रैर्न्नवव्यूहसमीपस्थकलशोदकेन चाभिषिञ्चेयुः पौराणोक्त
न एव सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्वराः वासुदेवोजगन्नाथस्तथासंकर्षणोविभुः १ प्रद्युम्नश्चानिरुद्धश्चभ
वंतुविजयायते आखण्डलोग्निर्भगवान्यमोवैनिर्ऋतिस्तथा २ वरुणःपवनश्चैवधनाध्यक्षस्तथाशिवः ब्रह्मणा
सहितास्सर्वेदिग्पालाःपांतुतेसदा ३ कीर्त्तिर्लक्ष्मीर्धृतिर्म्मेधापुष्टिःश्रद्धाक्रियामतिः बुद्धिर्ल्लज्जावपुःशांतिः
तुष्टिःकांतिश्चमातरः ४ एतास्त्वामभिषिञ्चंतुदेवपत्न्यःसमागताः आदित्यश्चन्द्रमाभौमोबुधजीवसितार्क्कजाः ५
ग्रहास्त्वामभिषिञ्चन्तुराहुःकेतुश्चतर्प्पिताः देवदानवगंधर्वायक्षराक्षसपन्नगाः ६ ऋषयोमानवोगावोदे
वमातरएवच देवपत्न्योद्रुमानागादैत्याश्चाप्सरसांगणाः ७ अस्त्राणिसर्वशस्त्राणिराजानोवाहनानिच
औषधानिचरत्नानिकालस्यावयवाश्चये ८ सरितस्सागराःशैलास्तीर्थानिजलदानदाः एतेत्वामभिषिञ्चं
तुसर्वकामार्थसिद्धये ९ इति जछजोराद्धरणामहः इति ततोयजमानःस्नात्वाशुक्लगंधमाल्याम्बरधरः
आचार्य्यादीन्संपूज्यतेभ्योदक्षिणांदद्यात् तत्राचार्य्यायधेनुः ब्रह्मणेकृष्णोऽनड्वान् एवंसदस्यर्त्विग्द्वा
रपालादिभ्योयथाशक्ति तथाधेनुःशंखस्तथानड्वान्हेमवासोहयःक्रमात् कृष्णोगौरायसश्छाग
एतावैदक्षिणाःक्रमात् ग्रहानुद्दिश्यदेयाः ततश्शक्त्याब्राह्मणान्भोजयेत्संकल्पयेद्वाऽशक्तौ ततोदी
नानाथेभ्योभूयसींदक्षिणांदत्वामण्डपदेवतानांग्रहपीठदेवतानांश्चोत्तरपूजांकृत्वा यांतुदेवगणाः०

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां०म० अभ्यारमिन्द्रयो० उत्तिष्ठब्रह्मणस्पतेइति उत्थाप्य विसृज्य मंडपादीन्प्रतिमादींश्च सर्वान्संभारान् आचार्य्या
४० यप्रतिपादयामि अस्य स्मृत्या च नामोक्त्या० प्रमादात्कुर्वतामिति पठित्वा० कर्मेश्वरार्पणं कृत्वा० विप्राशि
षो गृहीत्वा० तान्नमस्कृत्य० सुहृद्युतो भुंजीतेति सर्वं शिवम् ० इति श्रीभट्टशंकरात्मजभट्टनीलकण्ठ
कृतः शान्तिपरिभाषाप्रयोगः अथ ग्रहयाग शान्तिः यामले दुर्भिक्षादिभये चैव चतुर्ग्रहसमन्वये
महारोगभयं राष्ट्रक्षयो वृष्टिविनाशनम् पञ्चग्रहसमायोगे दुर्भिक्षं शंकरादिकम् नृपवैरं ग
र्भनाशो जायते जननाशनम् ग्रहषट्कसमायोगे मंत्रिणो मरणं भवेत् पशवश्वादिभयं सर्वं शंकरा
द्विजनक्षयः पट्टराज्ञो विनाशो वा महाभयमथापि वा सप्तग्रहसमायोगे क्षितीशमरणं ध्रुवम् जग
त्प्रलयमेवापि तदा निर्मानुषं जगत् अतऊर्द्ध्वं महोत्पातनानादुःखसमाकुलम् सूर्यस्य द्युति
रिक्तश्चेन्न राज्ञ्यो महद्भुतः विनाचंद्रेण योगोपि जगत्प्रलयकारणम् नष्टक्षजातजन्तूनाम्महारोगोम
हाभयम् अर्थनाशः स्थाननाशो महाहानिर्निपीडनम् वातपित्तादिसंभूतमहापीडा महद्भयम् समा
योगमहान्दृणं दोषान्कुर्वंति सर्वदा षण्मासाभ्यन्तरे वापि स्त्र्यायुर्हानिः प्रियस्तथा जन्माष्टद्वादशे
राशौ चतुर्थे पञ्चमेपि वा पूर्वोक्तफलमवाप्नोत् तस्माच्छान्तिं प्रयत्नतः कुर्य्याद्दोषानुसारेण वित्त रामः
शाठ्यं न कारयेत् नतज्ज्ञहाकीतकृत्वासो वर्स्मिनप्रयत्नतः सुवर्णेन तदर्द्धेन पादेनापि कनीयसीम्॥ ४०

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

वित्तशाठ्यं न कर्त्तव्यं कर्त्तव्यं शक्तितो नरैः पूर्वोक्तलक्षणेनैव ग्रहमूर्त्तिश्च कारयेत् ग्रहस्यैकैककलशं ग्रहयोगप्र-
माणतः कारयेत्कुंभमेकं वा निर्व्रणं सुदृढं नवम् ग्रहस्येशानदिग्भागेषु देशे समस्थले कुण्डे वा स्थ-
ण्डिले वापि होमं कुर्य्याद्विचक्षणः तस्य पूर्वोत्तरे देशे पूजास्थानं प्रकल्पयेत् चतुरस्त्रं हस्तमात्रं स्थण्डिलं
तण्डुलेन तु लिखेद्ग्रहाकृतिं तत्र स्थापयेत्प्रतिमां ततः अधिप्रत्यधिदेवादीन् दक्षिणोत्तरतः क्षिपे-
त् उक्तैर्गंधैस्तथा पुष्पैस्तन्माल्यैः फलैरपि ततो होममंत्रेण पूर्वोक्तेनैव पूजयेत् स्वस्तिवाच-
नपूर्वेणाचार्य्यमृत्विजैः सह ग्रहपूजादिकं कृत्वा नैवेद्यांतं समर्प्पयेत् ततो होमं प्रकुर्वीत स्वगृह्यो-
क्तविधानतः चतुर्थ्यन्तं प्रकुर्वीत कलशस्थापनं ततः पूर्वोक्तेन विधानेन शुद्धतोयेन पूरयेत् पञ्चा-
मृतं पंचगव्यं पञ्चत्वक् पञ्चपल्लवम् तत्र मंत्रैर्विनिःक्षिप्य औषधानि विनिःक्षिपेत् ततो होमवि-
धिना मूलान्याहृत्य निःक्षिपेत् अश्वलिङ्गी वीरणी वापि कलशं पूरयेद्गुरुः ततो होमविधिस्तत्र
न्मंत्रैर्हुनेद्यथ चर्वाज्येन जुहुयात्पश्चात्तिलाहुतिमथाचरेत् अथ स्विष्टकृतं कृत्वा होमशेषं समा-
पयेत् भद्रासनोपविष्टस्य यजमानस्य ऋत्विजैः कलशस्थोदकेनैव मभिषेकं समाचरेत् योग
ग्रहोक्तमंत्रैश्च अधिप्रत्यधिमंत्रतः नवग्रहोक्तमंत्रैश्च जातवेदादिपञ्चकैः त्रिपंचकेन मंत्रेण क्षे-
त्रस्य पतिनाप्यपि यतइंद्रद्वयेनैव लोकपालाष्टकैरपि सुरास्त्वा इति मंत्रेणायेन देवादयः क्रमात् ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

अनेनैव पुराणस्तेनैव अभिषेकं समाचरेत् अभिषेकान्तरं वस्त्रमाचार्याय निवेदयेत् ततः शुक्लांबरधरः
कुर्यादाज्यावलोकनम् ऋत्विग्भ्यो दक्षिणां दद्याद्धेनुं शंखादिकानपि तदभावे यथाशक्ति हिरण्यमपि दा
पयेत् ब्राह्मणान्भोजयेत्पश्चाद्यथाविभवसारतः एवं यः कुरुते भक्त्या ग्रहदोषविवर्जितः सर्वरोगैः सर्वदो
षैश्च विमुक्तः पुत्रवान्सुखी आयुरैश्वर्यसंपन्नो जीवेद्वर्षशतं नरः इह लोके सुखी भूत्वा पश्चाच्छि
वपुरं व्रजेत् इति ग्रहयोगशान्तिः अथ ग्रहस्नानानि विष्णुधर्मोत्तरे मंजिष्ठा मदमातङ्गकुंकुमं रक्तचं
दनम् पूर्णकुंभे ततोऽन्यैः सूर्यस्नानं विधीयते मदमातङ्गजमदः अन्ये पालिकाः उशीरं चैव शिरी
षं च कुंकुमं रक्तचन्दनम् शंखेन्यस्तमिदं स्नानं चन्द्रदोषविनाशनम् २ खदिरं देवदारुं च तिलानामा
लकानि च पूर्णकुंभे कृते सौम्य भौमपीडाविनाशनम् नदीसंगमतोयानि गजदन्तहतानि च न्यस्ता
नि कुंभे माहेये बुधपीडाविनाशनम् ४ माहेये मृन्मये औदुंबरं तथा बिल्वं वटमामलकं तथा न्य
स्तं तु कुंभे सौवर्णे जीवपीडाविनाशनम् ५ गोरोचनं नागमदः शतपुष्पा शतावरी विन्यस्ता राजते
कुंभे शुक्रपीडाविनाशनम् ६ तिलान्माषान्प्रियंगूंश्च गन्धपुष्पं तथैव च न्यस्तं कार्ष्णायसे कुंभे सौ
रिपीडाविनाशनम् ७ गुग्गुलं हिंगुलं तालं भुभां चैव मनःशिलाम् शृङ्गं च माहिषं न्यस्तं राहु
पीडाविनाशनम् ८ तालं हरितालम् वराहनिहता राजन् पर्वताग्रमृदं तथा छागच्छीरं खड्ग
पात्रे केतुपीडाविनाशनम् ९ वराहेन वराहोत्खाता खङ्गो गण्डकः उक्तं ग्रहस्नानमिदं सर्वपी

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

अथादित्यशांतिः भविष्ये आदित्यवारं हस्तेन सूर्वं(?) अंगृह्य विचक्षणः सर्वोक्तविधिना सर्वं कुर्य्यात्सृजादि
केरवेः प्रत्यर्कं सप्तनक्तानि कृत्वा भक्तिपरो नरः ततस्तु सप्तमे प्राप्ते कुर्य्याद्ब्राह्मणभोजनम् भास्करं
मुद्रसौवर्णं कृत्वा यत्नेन मानवः ताम्रपात्रे स्नापयित्वा रक्तपुष्पैः प्रपूजयेत् रक्तवस्त्रयुगच्छन्नं
छत्रोपानद्युगान्वितम् घृतेन स्नापयित्वा च लड्डुकान्विनिवेद्य च होमं घृततिलैः कुर्यादर्कनाम्ना
च मंत्रवित् समिधोष्टोत्तरशतमष्टाविंशतिरेव च होतव्यमधुसर्पिभ्यां दध्ना चैव घृतेन च मंत्रेण
तेन विदुषे ब्राह्मणाय प्रदर्शयेत् आदिदेव नमस्तुभ्यं सप्तसप्ते दिवाकर त्वं रवे तारयस्वास्मात्तस्मा
त्संसारसागरात् व्रतेनानेन राजेन्द्र भवेदारोग्यमुत्तमम् द्रव्यसंपत्सुतप्राप्तिरिति पौराणिका वि
दुः अपि सम्वादिनीवेयं शांतिः पुष्टिः सदा नृणाम् सूर्य्यपीडासु घोरासु कृता शान्तिः शुभप्र
दा १ अथ चन्द्रशान्तिस्तत्रैव तत्र चित्रासु संगृह्य सोमवारं विचक्षणः अनेनैवोक्तविधिना कु
र्य्यात्सृजादिकर्म्मविधौ सप्तमे तु ततः प्राप्ते कुर्य्याद्ब्राह्मणभोजनम् कांस्यपात्रे च संस्थाप्य सोमं
रजतसम्भवम् श्वेतवस्त्रयुगच्छन्नं श्वेतपुष्पैः प्रपूजितम् पादुकोपानहच्छत्रभोजनासनसंयु
तम् होमं घृततिलैः कुर्य्यात्सोमनाम्ना च वित् समिधोष्टोत्तरशतमष्टाविंशतिरेव वा होतव्या

मंत्र १

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां॰म॰ मधुसर्पिर्भ्यां दध्ना चैव घृतेन च दध्यन्नं शिखरे कृत्वा ब्राह्मणाय निवेदयेत् मंत्रेणानेन राजेन्द्र सम्य
४२ ग्भक्त्या समन्वितः महादेवजातवत्नौ पुष्पगोक्षीरपाण्डुर सोमसौम्यो भवास्माकं सर्वदा ते नमो
नमः अथ मंगलशान्तिः स्वात्यामङ्गारकं कृत्य क्षमायान्नेत्त भाजनम् ध्मान्तः सप्तमेत्वथ संप्राप्ते
हेमनाम्ने निवश्ययवे रक्तवस्त्रयुगच्छन्नं कुंकुमेनानुलेपितम् निवेद्य भक्तकं सारं पुष्पधूपा
द्यैनादिभिः होमं घृततिलैः कुर्यात् कुजनाम्ना च मंत्रवित् समिधोष्टोत्तरशतमष्टाविंशतिरेव वा
होतव्या मधुसर्पिर्भ्यां दध्ना चैव घृतेन च मंत्रेणानेन तद्दद्याद् ब्राह्मणाय कुटुम्बिने कुजकुप्रभवो
पित्वं मङ्गलं परिपठ्यते अमङ्गलानि कृत्वा सुसर्वदा यच्छ मङ्गलम् एवं कृते भौमकृत दुष्कृ
तशान्तिमाप्नुयात् कर्तव्यं भौमपीडासु तस्मात्प्रयत्नमानसैः अथ बुधशान्तिः विशाखासु बु
धं कृत्य सप्तनत्रान्यथाचरेत् बुधं हेममयं कृत्वा स्थापितं काश्यभाजने शुक्लवस्त्रयुगच्छन्नं
शुक्लमाल्यानुलेपनम् गुडौदनोपसंहारं ब्राह्मणाय निवेदयेत् बुधत्वं बुद्धिजननो बोधवा
न्सर्वदा नृणाम् तत्वावबोधं कुरु मे सोमपुत्र नमो नमः होमं घृततिलैः कुर्याद्बुधनाम्ना च मं रामः
त्रवित् समिधोष्टोत्तरशतमष्टाविंशतिरेव वा होतव्या मधुसर्पिर्भ्यां दध्ना चैव घृतेन च बुधशां ४२

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

न्तिरियम्प्रोक्ता बुधवैकृतिनाशिनी बुधदोषप्रकर्त्तव्या तथा शांतिकपौष्टिके अथ गुरुशांतिः गुरुस्त्वेवानुराधा

सु पूजयेद्भक्तितो नरः पूर्वोक्तेन विधानेन सम्पन्नस्तान्यथाचरेत् हेमं हेममयपात्रे स्थापयित्वा बृहस्पतिम् पीता

म्बरयुगच्छन्नं पीतयज्ञोपवीतिनम् पादुकोपानहच्छत्रकमण्डलुविभूषितम् पूजयेत्पीतकुसुमैः कु

ङ्कुमेन विलेपितम् धूपदीपादिभिर्दिव्यैः फलैश्चनूतननारिकेलैः खण्डकाद्युपहारैश्च गुरोरग्रे निवेदयेत्

धर्मशास्त्रार्थतत्त्वज्ञ ज्ञानविज्ञानपारग विबुधार्त्तिहराचिन्त्य देवाचार्य नमोस्तु ते होमं घृततिलैः कुर्य्या

द्गुरुनाम्ना च मन्त्रवित् समिधोष्टोत्तरशतम् अष्टाविंशतिरेव वा होतव्या मधुसर्पिर्भ्यां दध्ना चैव घृतेन च

समिधोऽश्वत्थस्य एतद्व्रतं महापुण्यं सर्वपापहरं शिवम् तुष्टिपुष्टिकरं नॄणां कुरुवैकृतनाशनम्

विषमस्थे गुरौ कार्य्या महाशान्तिरियं नृभिः अथ गुरुपूजा स्कान्दे कन्याविवाहकाले तु शुद्धिर्यस्य न वि

द्यते ब्राह्मणस्योपनयने यस्य स्यात् दुःस्थितो गुरुः दुःस्थितिप्राप्तः एभिः पूजा गुरोः कार्य्या विधिवद्भक्ति

भावितैः महती कामपुष्पाणि पात्रं पालाशसर्षपाः महन्तोऽर्पिता कामाद्दमनः गुडधीवा राणपा

मार्गविडङ्गं शंखिनी वचा सहदेवी विष्णुक्रान्ता सर्वौषध्यः शतावरी कुष्ठं मांसी हरिद्रे द्वे मुराशैलेयचं

दनम् वचाकर्चूरमुस्तेच सर्वौषध्यः प्रकीर्त्तिताः तथैवाश्वच्छभद्राङ्गाच पञ्चगव्यं जलन्तथा नूतनं सो

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां०म०
४३

दकुम्भञ्चपीतवस्त्रसमन्वितम् पञ्चरत्नैःसमायुक्तमीशान्यांस्थापितेऽनलात् यास्त्रोषधीतिमंत्रेण
सर्वास्तस्मिन्विनिक्षिपेत् कुम्भस्योपरिभागेतुस्थापयित्वाबृहस्पतिम् सुवर्णमपात्रेसौवर्णीम्प्रतिमांतु
युधिष्ठिर कारयेत्तुयथाशक्त्याविन्तशाठ्यविवर्जितः पीतवस्त्रयुगच्छन्नांपीतयज्ञोपवीतिनीम्
पूजयेद्गन्धपुष्पाद्यैस्ततोहोमंसमाचरेत् समिधोऽश्वत्थवृक्षस्यहोतव्याष्टोत्तरंशतम् तिलव्रीहियवा
ज्यमिश्रंहोतव्यञ्चयथाक्रमम् बृहस्पतेतिमंत्रेणऋषिच्छन्दःसमन्वितम् मंत्रेणानेनजुहुयाद्वान्यपूर्वं पाप
चयत्नतः ततोहोमावसानेतुपूजयेच्चबृहस्पतिम् पीतगन्धैस्तथापुष्पैर्धूपदीपैश्चभक्तितः दध्यो
दनञ्चनैवेद्यंफलताम्बूलसंयुतम् मंत्रेणानेनकौन्तेयसमभ्यर्च्यपुनःपुनः नमस्तेऽङ्गिरसानाथवा
क्यतेतेबृहस्पते क्रूरग्रहैःपीडितानाममृतायनमोनमः पूजयित्वासुराचार्यम्पश्चाद्दद्यान्निवेदये
त् गंभीरदृढरूपाङ्गदेवेज्यसुमतेप्रभो नमस्तेवाक्पतेशान्तगृहाणार्घ्यंबृहस्पते अर्घ्यमंत्रः
अर्घ्यंदत्वासुरेशस्यजपंहोमंसमापयेत् भक्त्यायत्नेसुराचार्यंहोमपूजादिसंस्कृतम् तवंगृ
हाणशांत्यर्थंबृहस्पतेनमोनमः सङ्कल्पमंत्रः मन्त्रेणानेनसङ्कल्प्यपश्चात्सम्प्रार्थयेन्नृप जी
वोबृहस्पतिःसूरिराचार्योगुरुरङ्गिराः वाचस्पतिर्देवमंत्रीशुभंकुर्यात्सदामम प्रार्थनामंत्रः
एवंसम्प्रार्थ्यविद्वांश्चाचार्यंचप्रपूजयेत् सर्वोपचारसंयुक्तांप्रतिमांतांयुधिष्ठिर प्रणम्यचगवां

[illegible]

राम:
४३

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां॰प्र॰
५५

कवे सर्वार्थसिद्ध्यर्थं गृहाणार्घ्यं नमोऽस्तु ते इत्येवमर्घ्यं कौन्तेय प्रणिपत्य विसर्जयेत् एवं शुक्रोदये कुर्याद्यात्रा
दिषु च भारत तद्वाचस्पतेः पूजां प्रवक्ष्यामि युधिष्ठिर सौवर्णपात्रे सौवर्णं ममरेशपुरोहितम् पीत
पुष्पाम्बरधरं कृत्वा स्नात्वा च सर्षपैः पालाशाश्वत्थभंगेन पञ्चगव्यतिलेन तु भगः पद्मवः पीता
कृरागवसनो हुतहोमं तु कारयेत् प्रणम्य तां गवा सार्द्धं ब्राह्मणाय निवेदयेत् नमस्ते गिरिशाना
थ वाक्पते ते बृहस्पते शुरग्रहैः पीडितानाममृताय नमो नमः इत्यर्घ्यमंत्रः संक्रान्तावपि कौन्तेय
यात्रास्वभ्युदयेषु च सर्वान्बृहस्पतेः पूजां सर्वान्कामान्समश्नुते अथवा मौक्तिकान्येव सुवर्णा
नि बृहन्ति च भार्गवाङ्गिरसौ चिन्त्यतान्येव प्रतिपादयेत् इति प्रतिशुक्रादिशान्तिः अथ शनिराहुके
तुशान्तयः भविष्ये शनैश्चरं राहुकेतू लोहपात्रे प्रनिक्षिपेत् कृष्णागुरुः स्मृतो धूपो दक्षिणा च
स्वशक्तितः यथाक्रमं शमीदूर्वाकुशानां समिधः स्मृताः सप्तमे त्वथ संप्राप्ते सौवर्णान्वाथ का
रयेत् कृष्णवस्त्रयुगच्छन्नमेकैकं कारयेद्बुधः मृगनाभ्या समालभ्य कृशराणि च निवेद्य च होमा
वसानेऽनन्तं सर्वं ब्राह्मणायोपपादयेत् शनैश्चर नमस्तेऽस्तु नमस्ते राहवे तथा केतवे च नमस्तुभ्यं सर्व
शान्तिं प्रयच्छत एवं कृते भवेद्यस्तु तन्निबोध नृपोत्तम यदि भौमो रविसुतो भास्करो रविणा सह
केतुश्च मूर्त्तौ तिष्ठन्ति सर्वपीडाकरा ग्रहाः अनेन कृतमात्रेण सर्वे शाम्यन्त्युपद्रवाः इति शन्यादिशान्तिः रामः
५५

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

अथाचार्य्यस्तु नियतो वेदवेदाङ्गपारगः यजमानं सपत्नीकं शांतचित्तं जितेंद्रियः कुम्भोदकं गृहीत्वा तु मं
त्रैरेतैः प्रसिंचयेत् ६६ मापोष्ठ मंत्रेणानामामग्निमूचा तथा या ओषधी रश्वावतीः कृष्णाराख्याभि
षेचयेत् पश्चात्संभोजयेद्विप्रान् यथाशक्त्या युधिष्ठिर एवं कृत्वा गुरोः पूजां सर्वान्कामानवाप्नुया
नु संक्रांतावपि कोतेय तथा स्वाभ्युदयेषु च कुर्वन्बृहस्पतेः पूजामभीष्टफलमाप्नुयात् संक्रांतो गुरुरस
क्रांतो गुरुपूजा अथ शुक्रशांतिः भविष्ये शुक्रे ज्येष्ठामुसंगृह्य क्षमाभूर्न्नैतभोजनम् क्ष्माभूः
गुरुर्न्नक्रममार्गेणा द्विजसंतर्प्पणेन च सप्तमे त्वथ संप्राप्ते रौप्यं शुक्रं तु कारयेत् वंशपात्रे च संस्थाप्य
पूजयेत्सितपङ्कजैः तदभावे सितैः पुष्पैस्ताम्बूलैश्चन्दनेन च अग्रतस्य प्रदातव्यं पायसं घृतसंयुतम्
दध्याहनेन मंत्रेण ब्राह्मणाय कुटुम्बिने भार्गवो भर्गः शुक्रः शुचिः श्रुतिविशारदः हृत्वा ग्रहहृतान् नृहो
वा नायुरारोग्यदोऽस्तु मे होमं घृततिलैः कुर्याच्छुक्रनाम्ना च मंत्रवित् समिधाष्टोत्तरशतेन अष्टाविंश
तिरथवा होतव्या मधुसर्प्पिभ्यां दध्ना चैव घृतेन च अथ शुक्रादिशान्तिः तत्रैव मात्स्ये अथातः शृणु
भूपाल प्रतिशुक्र प्रशांतये यात्रारंभेऽवसाने च तथा शुक्रोदये सति शुक्रपूजा प्रकर्त्तव्या तां निशा
मय भारत राजते वाथ सौवर्णे कांस्यपात्रेऽथवा पुनः शुक्लपुष्पाम्बरधृते श्वेततण्डुलपूरिते निधा
य राजतं शुक्रं मुचिमुक्ताफलान्वितम् महाश्वेतसमायुक्तं सामगाय निवेदयेत् नमस्ते सर्वलोके

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

भविष्योत्तरे ततो मंदस्य दिवसे स्नानमभ्यंगपूर्वकम् कार्य्यं देयञ्च विप्राय तैलमभ्यंगहेतवे यस्तु संवत
सरं यावत्सौम्ये शनिदिने रवेः तैलन्ददाति विप्राणां स्वशक्त्या पूजितेष्विवा ततः संवत्सरस्यान्ते प्राप्ते त
स्य दिने पुनः लोहं वृटापितं सौरि तैलकुंभे विनिक्षिपेत् लोहं वा मृन्मये वाथ कृष्णं वस्त्रयुगान्वि
तम् कृष्णं गां दक्षिणायुक्तं कृष्णकंबलशापितम स्वयमभ्यंगतः स्नात्वा कृष्णं पुष्पैस्समर्च्चयेत
सुगंधिगंधपुष्पैश्च कृशरान्नैस्तिलोदनैः पूजयित्वा सूर्य्यपुत्रं होमं स्वतिथं पुनः पुनः कृष्णाय द्विज
मुख्याय तद्भावेन रायच देयः शनैश्चरो भक्त्या मंत्रेणानेन वै द्विज क्रूरावलोकनवशाद्भवनत्रो
ज्झितो यग्रहो दुष्टः तुष्टो धनकनकसुखं ददाति सोस्मान् शनैश्चरः पातु यः पुतन्त्वेष्टो राज्याय नराय
परितोषितो स्वप्ने ददौ निजराज्यसमेस्सौरिः प्रसीदतु कोणनीलांजनप्रख्यं मंदचेष्टाप्रसारिणम्
छायामार्त्तण्डसंभूतं नमस्यामि शनैश्चरम् नमोर्कपुत्राय नीहारवर्णांजनमेचकाय श्रुत्वा रहः
स्यमवकामदस्त्वं फलप्रदो मे भव सूर्य्यपुत्र नमोस्तु प्रेतराजाय कृष्णदेहाय वै नमः शनैश्चराय क्रू
राय शुद्धबुद्धिप्रदायिने यएभिर्नामभिः स्तौति तस्य तुष्टिर्ददात्यसौ त्वदीयं तु भयं तस्य स्वप्नेपि
न भविष्यति स्कांदे श्रावणमासि संजाते शोभने शनिवासरे लोहरूपं शनिं कृत्वा स्नाप्य पंचामृतेन
वै पुष्पैरष्टविधैर्धूपैः फलैश्च विशेषतः नामभिः पूजयेदेतैः क्रमेणाग्रहसत्तमम् कोणस्तु पिं
ङ्गलो बभ्रुः कृष्णो रौद्रोयमोन्तकः ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां॰म॰ सौरिश्शनैश्चरो मन्दः पिप्पलादेन संस्तुतः शन्नोदेवीति सर्वत्र वैदिकेन च पूजयेत् पूजयित्वा च नैवेद्यं ततः कु
४५ र्य्यात्क्रमेण तु समाषभक्तं प्रथमे द्वितीये पायसं शुभम् तृतीये त्वविलीकार्य्या चतुर्थे पूरिका शुभा अविली
न कृत राहुल पिष्टादिनिर्म्मितो लघुविशेषः इति शनिव्रतम् अथ शनिस्तोत्रम् ततः कृताञ्जलिर्भूत्वा
स्तुतिं चक्रे स बालकः पिप्पलादो द्विजश्रेष्ठः प्रणिपत्य मुहुर्मुहुः नमस्ते कोणसंस्थाय पिंगलाय नमो
स्तु ते नमस्ते बभ्रुरूपाय कृष्णाय च नमोस्तु ते नमस्ते रौद्रदेहाय नमस्ते चान्तकाय च नमस्ते यमसंज्ञाय न
मस्ते सौरये विभो नमस्ते मन्दसंज्ञाय शनैश्चर नमोस्तु ते प्रसादं कुरु देवेश दीनस्य प्रणतस्य च शनैश्चर
उवाच परितुष्टोस्मि ते वत्स स्तोत्रेणानेन साम्प्रतम् वरं वरय भो वत्स येन यच्छामि वाञ्छितम् पिप्पला
द उवाच अद्य प्रभृति नो पीडा बालानां रविनन्दन त्वया कार्य्या महाभाग न स्वकीया कथंचन यावद्वर्ष
षष्टिकं जातं मम वाक्येन सूर्यज स्तोत्रेणानेन यो मर्त्यस्त्वां स्तुयात्प्रातरुपस्थितः तस्य पीडा न कर्त्तव्या देयो
लाभे महाभुज अर्द्धाष्टमिकया योगेनावके संस्थिते नरः सार्द्धसप्तवर्षपर्य्यन्तं द्वादशजन्मद्वितीयराशि
स्थितः शनैश्चरयोगः सार्द्धाष्टमिकया योग इत्युच्यते तद्वारे तु सम्प्राप्ते यस्तिलान् लोहसंयुतान् शक्त्या
ददाति नो तस्य पीडा कार्य्या त्वया विभो कृष्णांगाय तु विप्राय तद्वोद्देशेन यच्छति अर्द्धाष्टमिकया तस्य पीडा३
कार्य्या त्वया न च शमीसमिद्भिर्व्वा होमं तद्वोद्देन निर्वपेत् तथा कृष्णतिलैश्चैव कृष्णचन्दनानुलेपनैः रा॰म॰
पूजां करोति यस्तुभ्यं धूपं वै गुग्गुलं वहन् कृष्णं वस्त्रं गास्वेच्छ न्या तस्य त्वया व्यथा सूत उवाच एव ४५
ज्या
प्रे२

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मुक्तः शान्तिस्त्वेनवाक्यमित्येवजल्पंश्च नारदं समनुज्ञाप्य जगाम निजसंश्रयम् इतिशनैश्चरशान्तिः अथार्कविवा
हः प्रयोगरत्ने मात्स्ये तृतीयां मानुषीं नैव चतुर्थीं यः समुद्वहेत् पुत्रपौत्रादिसंपन्नः कुटुंबी साग्निको द्विजः
उद्वहेत्स्मृतिनिष्ठश्च यत्तृतीयां न कदाचन मोहादज्ञानतो वापि यदि गच्छेत्तु मानुषीम् नश्यत्येव न संदेहो गर्गस्य व
चनं यथा इति तत्रैव संग्रहे तृतीयायदि वोद्वाहस्तर्हि सा विधवा भवेत् चतुर्थादिविवाहार्थं तृतीयेऽर्कं समुद्वहेत्
आदित्यदिवसे वापि हस्तर्क्षे वा शनैश्चरे शुभे दिने वा हर्षाङ्कं कुर्यादर्कविवाहकम् व्यासः स्नात्वालंकृतवासा
स्तु रक्तगंधादिभूषितम् सपुष्पफलशाखैकमर्कमुल्लसमाश्रयेत् स्वस्तिपूर्वं तेन संयुक्तमर्कं संस्थाप्य यत्नतः
अर्घ्यं कन्याप्रदानार्थं माचार्य्यं वरयेत्पुरा अर्कसंनिधिमागत्य तत्र स्वस्त्यादि वाचयेत् नान्दीश्राद्धं हिरण्येन अ
र्कवर्गीन्पूजयेत् पूजयेन्मधुपर्केण वरं विप्रस्य हस्ततः यज्ञोपवीतं वस्त्रं च हस्तकर्णादिभूषणम् उष्णी
षगंधमाल्यादि वराया[illegible]प्रदापयेत् स्वशाखोक्तप्रकारेण मधुपर्कं समाचरेत् शाते यामात्मा[illegible]मुहूर्ते च यां
वा सुपुष्पफलसंयुतम् परीक्ष्य यत्नतो धस्तात् स्थंडिलादि यथाविधि कुर्यादितिशेषः कृत्वार्कं पुरतस्ति ति
ष्ठन्प्रार्थयेत द्विजोत्तमः त्रिलोकवासिन्सप्ताश्वच्छायया सहितो रवेः तृतीयोद्वाहजं दोषं निवारय सुखं कु
रु तत्राधारोपदेवेशं छायया सहितं रविम् वस्त्रमाल्यैस्तथा गंधैस्तन्मंत्रेणाव पूजयेत् तत्रवश्चैव वस्त्र
णातयाकार्य्यास्तंतुभिः गंधपुष्पैस्तमभ्यर्च्यार्कं मल्लिकां गिरमिश्रिताक्ष्यं च गुडौदनेन तु नैवेद्यं ताम्बूलं च समर्पये
त् व्यासः अर्कं प्रदक्षिणीकुर्वन् जपन्मंत्रमिमं बुधः मम प्रीतिकरायेयं मया सृष्टा पुरातनी अर्कजा
ब्रह्मणा सृष्टा अस्माकं प्रतिरक्षतु पुनः प्रदक्षिणीकुर्यान्मंत्रेणानेन मंत्रवित् नमस्ते मंगले देवि नमः

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

श्रां॰ म॰
५६

सवितुरात्मजे त्राहि मां कृपया देवि पत्नीत्वं मे इहागता ॥ अर्कं त्वं ब्रह्मणा सृष्टः सर्वप्राणिहिताय च । वृक्षाणा-
मादिभूतस्त्वं देवानां प्रीतिवर्द्धनः ॥ तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशय ॥ ततश्च कन्यावरणं त्रिपुरुषकु-
लमुच्चरेत् । आदित्यः सविता वार्कः पुत्रपौत्री च नप्त्रिका । गोत्रं कश्यप इत्युक्तो लोके लौकिकमाचरेत् । शुकु-
कृतैर्निरीक्षेत स्वस्तिसूक्तमुदीरयेत् । आशीर्भिस्सहितं कुर्यादाचार्य्यप्रमुखैर्द्विजैः ॥ अथाचार्य्यसमा-
हूय विधिना तन्मुखाञ्चताम् प्रतिगृह्य ततो होमं गृह्योक्तविधिना चरेत् । मन्त्रः । अर्ककन्यामिमां विप्र य-
थाशक्ति विभूषिताम् । गोत्राय शर्म्मणे तुभ्यं दत्तां विप्र समाश्रय ॥ अर्केऽल्पक्षतकर्म्माणि कृत्वा कङ्कणा-
पूर्वकम् । यावत्स्यञ्चामृतं सूत्रं तावद्दर्भं प्रविष्टयेत् । स्वशाखोक्तेन मन्त्रेण गायत्र्या वाथवा जपन् । पञ्ची-
कृत्य पुनः सूत्रं स्कंधवधाति मंत्रतः । वृहत्सामेति मन्त्रेण सूत्ररक्षां प्रकल्पयेत् ॥ अर्कस्य पुरतः पश्चाद्द-
क्षिणोत्तरतस्तथा कुम्भांश्च निक्षिपेत् पश्चादाग्नेयादिचतुष्टये । सवस्त्रं प्रतिकुम्भं च त्रिसूत्रेणैव वेष्टये-
त् हरिद्रागन्धसंयुक्तं पूरयेच्छीतलं जलम् । प्रतिकुम्भं महाविष्णुं सम्पूज्य परमेश्वरम् । पाद्यार्घादिनिवे-
द्यान्तं कुर्याद्धोमं त्वेवं मन्त्रवित् । अत्र शौनकोक्तो होमप्रकारः । तृतीयस्त्रीविवाहे तु सम्प्राप्ते पुरुषस्य तु । अ-
र्कविवाहं वक्ष्यामि शौनकोक्तविधानतः । अर्कसन्निधिमागम्य तत्र स्वस्त्यादि वाचयेत् । नान्दीश्राद्ध-
प्रकुर्वीत स्थण्डिलं च प्रकल्पयेत् । अर्कमभ्यर्च्य सोर्य्याच्चैर्गन्धपुष्पाक्षतादिभिः । सोर्य्यान्तं पदेव
तया आवाहनेनानया स्वयञ्चालंकृतं तत्र वस्त्रमाल्यादिभिः शुभैः । अर्कस्योत्तरदेशे तु समन्वी

राम॰
५६

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

एतयार्ककन्यया उद्वर्त्तनादिकं कुर्य्यात् धारां ततः परम् आज्याहुतिं चतुष्कं यात् संगोभिरनयैकया
यस्मै त्वा काम कामायेत्येतत्पूर्वां ततः परम् व्यस्ताभिश्च समस्ताभिस्ततश्च स्विष्टकृद्भवेत् परिषेचनपर्यन्तम
पाश्चेत्यादिकं क्रमात् प्रार्थना मंत्रादि विशेषमाह व्यासः ॐ नमः प्रदक्षिणं कृत्वा मंत्रमेतमुदीरयेत् म
या कृतमिदं कर्म्म स्थावरेषु जरायुणा अर्कापत्यानि मे देहि तत्सर्वं क्षन्तुमर्हसि इत्युक्त्वा शान्तिसूक्तानि
जप्त्वा तं विसृजेत् पुनः गामुग्मं दक्षिणां दद्यादाचार्य्याय च भक्तितः इतरेभ्योपि विप्रेभ्यो दक्षिणाञ्चापि
शक्तितः ततः सर्वं गुरवे दद्यादन्ते पुण्याहमाचरेत् अथ प्रयोगः तृतीयोद्वाहात्प्राग्दिनचतुष्टयाधिक
व्यवहिते रविवारे शनिवारे हस्तनक्षत्रे शुभे दिनान्तरे वा ग्रामात्प्राच्यामुदीच्यां वा सपुष्पफलयुतार्का
धस्तात् स्थण्डिले कृत्वार्कं पश्चिमतः उपविश्य मासपक्षाद्युल्लिख्य मम तृतीयमानुषीविवाहजदोषा
पनुत्त्यर्थमर्कविवाहं करिष्ये इति संकल्प्य गणेशपूजा स्वस्तिवाचनमातृपूजनवृद्धिश्राद्धाचार्य्यव
रणानि कुर्य्यात् तत्र वृद्धिश्राद्धं हेम्ना अथाचार्येणापूजितो वरः त्रिलोकवासिन् सप्ताश्वछायया स
हितो रवे तृतीयोद्वाहजं दोषं निवारय सुखं कुरु इत्यर्कं संप्रार्थ्य अर्कस्याकृष्णेनेति छायया सहितं र
विमावाह्य श्वेतवस्त्रसूत्राभ्यामावेष्ट्य संपूज्य आपो हि ष्ठेत्यभिषिच्य गुडोदनताम्बूलादि समर्प्य प्र
दक्षिणीकुर्वन् मम प्रीतिकारयेयं मया सृष्टा पुरातनी अर्कजा ब्रह्मणा सृष्टा अस्माकं प्रतिरक्षतु
इति तत्पठेत् द्वितीयप्रदक्षिणायां तु नमस्ते मंगले देवि पत्नीत्वं च मे ह्यागता अर्कत्वं ब्रह्मसृष्टः ॥१

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां·म· ५७

सर्वप्राणिहितायच वृक्षाणामादिभूतस्त्वं देवानांप्रीतिवर्द्धनः तृतीयोद्वाहजं पापं मृत्युं चाशुविनाशय
इति ततआचार्य्यणामासपक्षाद्युल्लिख्य· काश्यपगोत्रामादित्यस्यपुत्रीं सवितुःपौत्रीमर्कस्यप्रपौ
त्रीमिमामर्ककन्यामित्युक्त्वा वरः स्वस्तिनइन्द्रोवृद्धश्रवाइतिसूक्तं पठन् अर्कंनिरीक्षेत ततआचार्य्या
विप्रैःसहाशिषोदत्वा· अमुकगोत्रायामुकशर्म्मणेसंप्रददे· इत्यर्ककन्यांदत्वा· अर्ककन्यामिमांवि
प्रयथाशक्तिविभूषितां गोत्रायशर्म्मणेतुभ्यंदत्तांविप्रसमाश्रयेतिपठेत् वरस्तु· यत्रायेकामः
समृध्यतामितिप्रथमाम् धर्म्मोमे·इतिद्वितीयाम् प्रशोमेइतितृतीयामिति· ततनक्षतांजलीनर्कोप
रिक्षिप्त्वा· गायत्र्यापरिवेत्यादिनावापंचावृत्तासूत्रेणार्कमावेष्ट्यतत्सूत्रेपुनःपञ्चगुणीकृत्वार्क
स्यस्कन्धेबध्वा· बृहत्सामेतिरक्षांपरिकल्प्य अर्कस्यदिग्विदिक्षुचलोकुंभान्संस्थाप्यतेषुसूत्रेणत्रिसूत्
त्रेणचावेष्ट्य· हरिद्रागंधाद्यैः सिक्त्वातेषुनाम्नामहाविष्णुमावाह्यषोडशोपचारैः संपूज्य· स्थण्डि
लेऽग्निंप्रतिष्ठाप्य· आघारावाज्यभागान्तमुक्त्वाऽत्रप्रधानंबृहस्पतिमग्निवायुसूर्य्यप्रजापतींवाज्ये
नहोष्येत्याद्युक्त्वाघारान्तेसंगोभिरंगिराबृहस्पतिस्त्रिष्टुप्· अर्कविवाहहोमेविनियोगः ॐ संगोभि
रांगिरसोनक्षमाणोभगइवेदर्य्यमणंनिनाय जनेमित्रोनदंपती अनक्ति बृहस्पतेवाजयाशूरिवा
जौस्वाहा· बृहस्पतयइदंनमम· इतिप्रजेत् यस्मैत्वावामदेवोग्निस्त्रिष्टुप्विनियोगः प्राग्वत् ॐ यस्मै रामः
त्वाकामकामायचयंसम्राज्यजामहे तमस्मभ्यंकामंदत्वाथेदंत्वंघृतंपिबस्वाहा अग्नयइदम् ततोप्य ५७

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

स्तमस्तथ्याह निमिर्ध्नुत्वा स्विष्टकृदादि कर्म्मशेषं समाप्याचार्क्षग्रहस्मरणि कुर्य्यात्· मयाकृतमिदं कर्म्म स्थावरेषु जरा
युजेषु अर्ध्दपत्यानि नोदेहि नत्सर्वेसंतु मह सौतिमामाचार्यायगोयुग्ममन्नेभ्यश्च विप्रेभ्यो यथाशक्ति दक्षि
णां दत्वा· शांतिसूक्तं जप्त्वा ह्युपस्करानाचार्याय दत्वा दिनचतुष्टयमग्निं कुंभांश्च रक्षेत् कुंभेषु महावि
ष्णुं पूजयेच्च पञ्चदिनकृत्यमाह चतुर्थे दिवसे तीते पूर्ववज्जाप्यं जपं च विसृज्य होममग्नि त्वं विधिना मा
नुषीपरम् उद्वहेत् तथानेन वपुत्रपौत्रसमृद्धिमान् इति श्रीभट्टनीलकंठकृते भास्करे शांतिमयूखे
कविवाह: नारद: कुलीरवृषचापांत्यनृयुक्कन्यातुलाघटा: राशय: शुभदा ज्ञेया नारीणां प्रथमा
र्त्तवे कुलीर: कर्क: चापं धनु: अंत्यो मीन: नृयुक् मिथुनम् घट: कुंभ: स्मृतिचंद्रिकायाम् शुक्लप
क्षे सुशीला स्यात् कृष्णे सा कुलटा भवेत् कृष्णस्य दशमी यावन्मध्यमं फलमादिशेत् तथा तत्रैव अ
मा रिक्ताष्टमी षष्ठी द्वादशी प्रतिपत्स्वपि परिघस्य च पूर्वार्द्धे व्यतीपाते च वैधृतौ संध्यास्वुपप्लवे वि
ष्टामशुभं प्रथमार्त्तवम् रोगी पतिव्रता दु:खी पुत्रिणी भोगभागिनी पतिव्रता क्लेशयुक्ता सूर्य्यवा
रादिषु क्रमात् कश्यप: अष्टमी षष्ठ्यमायुक्ता द्वादशी संक्रमे पि वा वैधृतौ च व्यतीपाते ग्रहणे च
द्रसूर्य्ययो: विष्ट्यां संध्यासु निद्रायां दुर्भगा प्रथमार्त्तवे नक्षत्रफलमाह गर्ग: सुभगा चैव दु:शी
ला वंध्या पुत्रसमन्विता धर्म्मयुक्ता व्रतस्त्री च परसंतानमोदिनी सुपुत्रा चैव दु:खपुत्रा पितृवेश्म
रतस्सदा दीना प्रजावती चैव पुत्राद्या चित्रकारिणी स्वकर्म्मनिरता हिंस्रा भरणपापोत्रादि संयुता

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां॰म॰ ४८ नित्यं धर्म्मकथाशक्ता पुत्रधान्यसमन्विता मूर्खार्थघा गुणवती दस्वक्षादिः क्रमात्फलम् स्नातिरात्रे शुभं
चैवं तु पूर्वाह्णे मध्याह्ने मध्यमं फलम् अपराह्णे तु वैधव्यं पूर्वरात्रे शुभम्भवेत् मध्यरात्रे तु मध्यं स्यात्पररात्रे शु
भान्विता कश्यपः मलिनां मंदवारे स्यात् ग्रामावपि तथैव चेति स्मृत्यंतरे मध्याह्ने तु भवेद्वश्या निशीथे विधवा भ
वेत् अमासंक्रांतिविष्टीचव्यतीपाते च वैधृतौ परिघस्य तु पूर्वार्द्धं षड्गंडातिगण्डयोः व्याघाते नवशूले तु ना
ड्यः पंचचतुर्दशी वैधव्यमर्थहानिं च सुतनाशं महद्भयम् वैधव्यशत्रुवृद्धिं च दारिद्र्यं क्षीणजीवनम् तेजो
हानिं समायाति स्त्री पुष्पवती क्रमात् स्थलभेदफलभेदमाह वशिष्ठः ग्रामाद्बहिः परग्रामे वा चेत्स्याद्व्य
भिचारिणी पतिव्रता पतिस्थाने सुशीला गृहमध्यके ग्राममध्ये तु वृद्धिः स्याद्विधवा दिग्वरपरागारे च दुःशी च
ला आयुष्यं जलसन्निधौ धनमध्ये तु कन्यायां धनधान्यसमृद्धिदा परागारऽत्यनेनैव पितृभ्रातृगृहं निषिद्धम्
तथा च वशिष्ठः वारः विशेषनिषेधस्तु न दृश्यते तथा चंद्रसद्गुणसंयुक्ते देवराजमतात् शुभम् शावाशौ
चेपि अशुभमिति गुरवः वस्त्रफलमाह वशिष्ठः शुभगा श्वेतवस्त्रा स्यात् दृढवस्त्रा पतिव्रता क्षौमवस्त्राक्षि
तीशा स्यान्नववस्त्रा सुखान्विता दुर्भगा जीर्णवस्त्रा स्यात् रोगिणी रक्तवाससा नीलांबरधरा नारी वि
धवा पुष्पिता यदि मलिनांबरतो नारी दरिद्रा स्याद्रजस्वला रजोबिंदुफलमाह स एव वस्त्रे सुर्विंबमारक्त
बिंदवः पुत्रमाप्नुयात् समाश्वेतकं यत्काचेति फलं स्यात् अथ मार्त्तवे देवरातः संमार्जनीकाष्ठतृणाग्नि राम: ४८
शूर्पान् हस्ते दधाना कुलटा तदा स्यात् तल्पे समभोगेन पसिस्थिता च दृष्टरजो भाग्यवती तदा स्यात् नारदः

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

तिथ्यर्क्षवारानिंद्याश्चेच्छुभकर्म्मनिवारयेत् दोषाधिगुणगात्मत्वेनतथापिनकारयेत् दोषाल्पत्वेगुणाधिक्ये
शुभकर्म्मसमाचरेत् निंद्यर्क्षतिथिवारेषुयदिपुष्पंप्रदृश्यते तत्रशांतिंप्रकुर्वीतदध्नादूर्वातिलाक्षतैः प्रत्येक
शतमष्टौचगायत्र्यानुकुर्यात्ततः स्वर्णगोभूतिलान्दद्यात्सर्वदोषापनुत्तये भर्त्ताभिगमनंतत्रवर्ज्जयेच्छय्या
स्तदर्शनात् वशिष्ठोपि प्रभूतदोषपर्यदिदृश्यतेतत्पुष्पंततः शांतिककर्म्मकार्य्यंविवर्ज्जयेद्देवतदेकशय्याया
वद्गृहोदर्शनमन्यवत्त्रे आर्त्तवानांतुनारीणांशांतिंवक्ष्यामिशौनकः तिथिवारर्क्षयोगेष्वालग्नेशग्रह
मनवांशग्रहेभ्योदुःस्थितेष्वथवातत्तद्दोषक्षयायच अत्रपुत्रस्यलाभायदंपत्योरभिवृद्धये पञ्चमोक्ष
चतुर्थेवाग्रहजन्मपुरःसरम् तस्मिन्नहनिकर्त्तव्यंतुहोमविधानंततः आचार्य्यंवरयेत्स्नात भुवनेश्व
रितुष्टये होमार्थंचजपार्थंचवरयेद्दतुजोवहून् यजमानोद्विजैःसार्द्धंशांतिहोमंसमाचरेत् गृहा
दीशानदिग्भागेदेवतापूजनायच द्रोणप्रमाणधान्येनव्रीहिराशित्रयंभवेत् कुंभत्रयंन्यसेद्ग्राशोतं
तुवस्त्रादिवेष्टितम् पूरयेत्तीर्थशलिलैः प्रतिकुंभंपृथक्पृथक् सूक्तेनाथचर्वेणप्रस्तुव आपइत्यथ
र्माचायाः प्रवतस्तदजायत्राचततःक्रमात् मध्यकुंभेक्षिपेद्धान्यमोषधानिचहेमच ततश्चपंचरत्ना
निगंधपुष्पाक्षतायुतान् औषधानिचवक्ष्यंतेमुनिभिःशांतिकारणात् औदुंवरंकुशादूर्वाराजी
वंपंचविल्वकाः विष्णुक्रांतायतुलसीवर्हिवंशांखपुष्पिका शतावर्य्यश्वगंधाचनिर्गुण्डीसर्षप
द्वयम् अपामार्गःपलाशश्चपनसीजीवनस्तथा प्रियंगवश्चगोधूमाव्रीहयोश्वत्थएवच श्री

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां.म. रम्वदधिसर्पिश्चपर्णस्त्वैवतपोन्यलान् कुररादकञ्चगुञ्जावचचामुस्तकभद्रकाइति द्वात्रिंशदोषधानी
४९ हणायश्चासर्वमाहरेत् गजाश्वरथ्यावल्मीकसंगमाहृतगोकुलात् राजद्वारप्रदेशाच्च मृदमानीयनिक्षि
पेत् कुम्भस्यापनमित्साहनतत्तन्मन्त्रेणाकारयेत् मृत्तिकाश्चौषधाश्चैतिमन्त्रेणप्रक्षिपेत्क्रमात् कुं
भोपरिन्यसेत्पात्रंकांश्यंवाताम्रमेववा मृन्मयंवेणुपात्रंवासस्वविन्तानुसारतः पात्रोपरिन्यसेद्देवं
प्रतिमांभुवनेश्वरीम् तन्मूलमन्त्रान्यसेत्पात्रेइन्द्राणींचपुरन्दरम् आचार्य्यः पूजयेद्देवीमंगान्या
वरणानिच अन्योवापूजनंकुर्य्याज्जायत्रामन्त्रसारया इन्द्राणींपूजयेद्देवीमिंद्राणीमासुना
शिषु क्रमेणपूजयेदिन्द्रमिन्द्रत्वावृषभन्द्यम् अनेनविधिनावापूजयेद्देवतात्रयम् आवाह
नादिसकलेरुपचारैः पृथक्पृथक् तन्मध्यमंस्पृशन्कुंभमन्त्रेणभुवनेश्वरीम् जपेदाचार्य्य
श्चाहोमाद्यष्टोत्तरंचजपेत्ततः स्पृशंश्चदक्षिणंकुंभंऋत्विगेकोजपेदथ चत्वारिंशद्दशकानिच
तुर्मन्त्रोनगणिताचे संस्पृशन्नुत्तरंकुंभंश्रीरुद्रंरुद्रसंख्यया मन्त्रंइन्द्राणीसूक्तञ्चतत्रचैवस्पृश
भागे ८ न्जपेत् कुंभस्यपश्चिमेशान्तिहोमंसमाचरेत् अन्वाधानन्ततःकुर्य्याद्धोमतन्त्रंसमाचरेत् कुर्म
पात्रनिधानांतंकृत्वाकार्य्यंद्विजैःसह दूर्वाभिस्तिलगोधूमैःपायसेनघृतेनच पायसंश्रपयेत्त
त्रसावित्रंवहविश्वतत् कृत्वाचभागपर्य्यन्तंहविरुद्वासनादिकम् तिसृभिश्चैवदूर्वाभिरेकैका राम:
हुतिभिर्भवेत् आभिर्मन्त्रप्रयुक्ताभिर्गायत्रीं जुहुयात्क्रमात् हविश्चतुष्टयेनैवप्रत्येकंशतसं ४९

गायत्र्यैव तु होतव्यं हविरन्न चतुष्टयम् ततः स्विष्टकृतं कृत्वा रत्नग्रहणं तथा अपाश्वेत्यादिभिः कु
त्वा समुद्राहृ स्विस्सूक्तेन ततः संततामाज्यधारां तां हुत्वा पूर्णाहुतिमथाचरेत् परिषेचनपर्यन्तं होमशेषं स
मापयेत् महौषधिस्थितेस्तत्र प्रतिकुम्भस्थितोदकैः अनुमत्याः स्त्रियाः शान्तिं दम्पतीभ्यां सुखाय च
अथाभिषेकमन्त्राश्च प्रोच्यन्ते शौनकादिभिः त्र्यम्बकेमिति मन्त्रेण जातवेदस एकया समुद्रज्येष्ठा
इत्यादि चतुर्भिश्च प्रसिद्धकैः आयनामितिमन्त्रैश्च त्रिभिश्चापि यथाक्रमम् इमा आपस्त्वेनेव वद
इत्याति च मन्त्रेण मन्त्रेणापतमीशानं च मन्त्रेण इन्द्रइन्द्रस्यथ नमुञ्चहीति मन्त्रेण भुवनस्य पितुस्तथा या
ते रुद्रेति मन्त्रेण शिवसंकल्पमन्त्रतः इन्द्रत्वा वृषभं वयं मन्त्रैश्चैवाभिषेचयेत् सा च वस्त्रान्तरं धृत्वा पु
नश्चैवोपवासिनी उपवासः समीपावस्थानं विप्रानभ्यर्च्य विधिवद्गन्धपुष्पाक्षतादिभिः धेनुम्पय
स्विनीं दद्यादाचार्याय च भूषणैः सदक्षिणामनड्वाहं प्रदद्यात्तु दुर्जापिने अनुगम्यश्चाध सर्व
भ्यो दद्याद्दक्षिणां ततः महाशान्तिं प्रजप्याथ विप्राशीर्वचनं ततः ब्राह्मणान्भोजयेच्चैव भुक्त्वा या
त्स्वजनैः सह स्त्रीतौ ब्राह्मणान्भोजयित्वा तु देवज्ञं भोजयेत्ततः एवं यः कुरुते शान्तिं शौनकोक्तप्र
कारतः तदानिष्टं तु सकलं सर्वं वापि विनश्यति इति शौनकोक्तरजोदर्शनशान्तिः अथ प्रयोगः
म२ कर्त्ता देशकालौ स्मृत्वा सपत्न्याः प्रथमरजोदर्शने अमुकदुष्टमासादिसूचितारिष्टनिरसना
र्थं शान्तिं करिष्ये इति संकल्प्य गणेशपूजनस्वस्तिवाचनं मातृकापूजनाभ्युदयिकाचार्य

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां॰म॰
५०

त्रिंश्वरणानि कुर्यात् अथाचार्यो गृहे शान्त्यां प्रत्येकं मंत्रान्त्या पदार्थानुसमयेन कुंभत्रयं स्थापयेत् तद्य
या मही द्यौरिति मध्ये तद्दक्षिणोत्तरयोश्च स्पृष्ट्वा ओषधय इति स्पर्शः क्रमेण तेषु स्थानेषु द्रोणप्रमाणा
न्राशीन्कृत्वा तेनैव क्रमेण राशित्रये आकलशेष्विति कुंभत्रयं स्थाप्य मध्यस्थे ध्रुवस्थापद्धतिनवभिस्त
द्दक्षिणे पापवत्स्पृष्ट्वा तदुत्तरे गायत्र्या जलं क्षिप्त्वा त्रिष्वपि गंधद्वारामिति गंधया ओषधीरिति स
र्वौषधीः ओषधयः समिति यवान् क्षिप्त्वा मध्यमे एवं व्रीहियवतिलमाषकंगुश्यामाकमुद्गान् क्षिप्त्वा कु
वरकुशदूर्वारक्तोत्पलचंपकविल्वविष्णुक्रान्ततुलसीवाहिवशोषपुष्पीशतावर्यश्वगंधाद्विगुरीरक्तपीत
सपामार्गपलाशपनसजीवकप्रियंगुगोधूमव्रीहिश्वदूर्वादधिदुग्धघृतपञ्चपत्रनीलोत्पलसितरक्त
पीतकुरंटकगुंजावचाभद्रकमुस्तकाख्यानि द्वात्रिंशदौषधानि यथासंभवं गायत्र्या क्षिप्त्वा त्रिषु दूर्वापञ्च
पल्लवसप्तमृत्तिकाफलपञ्चरत्नसुवर्णानि क्षिप्त्वा युवा सुवासा इति वाससा सूत्रेण वा कुंभकण्ठान्वे
ष्टयित्वा गंधादिभिरलंकृत्य सुवर्णा देवीति यवादिपूर्णपात्रादि निधाय तेषु साष्टदलश्वेतवस्त्रत्रयं
न्यस्य मध्यमे गायत्र्या विश्वामित्रो भुवनेश्वरी गायत्री भुवनेश्वर्यावाहने विनियोगः तत्सवितुरिति भुव
नेश्वरीं तद्दक्षिणकुंभे इन्द्राणीं ब्रह्मा ककुविड् इन्द्राणी पङ्क्तिः इन्द्राण्यावाहने विनियोगः इन्द्राणीमासु नारीषु इ
ति इन्द्राणीमुत्तरकुंभे इन्द्रं त्वा विश्वामित्र इन्द्रो गायत्री इन्द्रावाहने विनियोगः इन्द्र त्वेतीन्द्रं मति मासु संस्था
प्य षोडशभिः पञ्चभिर्वा उपचारैः संपूज्य मध्यमे ५ सहस्रं अष्टशतं वा गायत्रीमंत्रं जपेत् ततः एक रा॰म॰
त्रिंशद्दक्षिणकुंभे इन्द्रसूक्तानि जपेत् तानि च कद्रुद्रायेत्येकादशर्चं इमा रुद्राय तवसे इत्येकादशर्चं इमा ५०

शु८

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

रुद्रायस्थिरधन्वनइतिपञ्चर्चम् आजेपितरितिपञ्चदशर्चम् तमुष्टुहीत्येका भुवनस्यपितरमित्येका अन्यथार्त्वि
गुत्तरकुंभेएकादशावृत्या· इदंरुद्रायेतिपञ्चदशार्च्चं जपेत् अथाचार्य्यः कुंभपश्चिमेऽग्निंसंस्थाप्यतदी
शान्यांग्रहस्थापनादिपूजांनकृत्वा· तदीशान्यामेककुंभंसंस्थाप्य· तत्रवरुणावाहनादिपूजांनकृत्वा·न्वाद
धानात् तत्रास्मिन्नन्वाहितेऽन्नावित्यादिचस्रुवौ आज्येनत्वंनमुक्त्वा·भुवनेश्वरीमिंद्राणीमिन्द्रंच प्रत्येकम
मुकसंख्यया दूर्वातिलमिश्रगोधूमपायसाज्यैर्ग्रहांश्चामुकसंख्यया समिच्चर्वाज्यैः शेषेणास्विष्टकृतमि
त्यादिपरस्पदन्तमुक्त्वा परिस्तरणाद्याज्यभागांतंकृत्वा यजमानेनागप्रधानदेवताउद्दिश्यैतान्यद्रव्याणि मम
इत्युक्ते आत्विग्भिः स्वाहान्वाधानोक्तक्रमेणजुहुयात् इंद्राणीद्वयोर्होमोनास्तीतिकेचित् भुवनेश्वरीम
स्तयोर्न्यूनसंख्ययाहोमइत्यनेन ततःस्विष्टकृदादिकृत्वा समुद्राद्वूर्म्मिरितिचवनस्पतीञ्जातिनिकृत्वा प्रणी
ताविमोकंकृत्वा आत्विग्भिः सहसभार्य्यंयजमानंकुम्भोदकेरभिषिंचेत् तत्रमंत्राः आपोहिष्ठेतिनव
वरत्नगन्धाष्टगंधसर्वौषधीः क्षिप्त्वा वस्त्रयुग्मेनावेष्ट्य पूर्णपात्रन्निधाय तत्र वैधृतिशान्तौ मध्ये स्वर्णकृ
मिति रुद्रं तद्दक्षिणतस्तु सूर्य्यं इति सूर्य्यमुत्तरतश्चाप्यायस्वेति सोमं व्यतीपातसंक्रान्तिशान्त्योस्तु मध्ये सूर्य्यं
तद्दक्षिणतोऽग्निं दूतमित्यग्निमुत्तरतो रुद्रं तत्तत्प्रतिमास्वावाह्य षोडशभिः पञ्चभिर्वोपचारैः संपूज्य रुद्र
सूर्य्यसोमप्रतिमासु प्रत्येकं सहस्राष्टशताष्टाविंशत्यन्यतरसंख्यया मृत्युञ्जयमंत्रमुपघन्तघेत्यादि
सर्वसोरसंत्रानाप्यायस्वेति चक्रमाज्जपेत् व्यतीपातसंक्रान्तिशान्त्योस्तु पूर्ववत्सौरजपस्ततो मृत्युंजयजपः
ततो ऋत्विजः प्रागादिदिक्षु चतुष्कक्रमेण गणानां भद्राज्ञ्ये सह स्त्रशीर्षा कृष्णुयाचेति सूक्तानि जप्त्वा कुं
भात्पश्चिमेऽग्निं प्रतिष्ठाप्य ग्रहावाहनादि पूजान्तं कृत्वाद्ध्यात तत्र चक्षुषी आज्येनेत्यन्ते रुद्रसूर्य्यसो
मान् समिच्चर्वाज्यैस्तत्तन्मन्त्रैर्मृत्युंजयमंत्रेण च तिलाहुतिभिरष्टसहस्राष्टशताष्टाविंशत्यन्य
तमसंख्यया होमं स्विष्टकृतमित्यादि व्यतीपातसंक्रान्तिशान्त्योस्तु सूर्य्याग्निरुद्रा इति विशेषः
ततश्चाज्यभागान्तेऽन्वाधानक्रमेण कृत्वा बलिदानान्ते कलशोदकैः समुद्रज्येष्ठा इति सूक्तेनापो हि
ष्ठेत्यृचेनाप्तीभ्यामिति सूक्तेन यावमानाभिः प्रधानाधिप्रत्यधिदेवतामन्त्रैः सुरास्त्वेत्यादिपौरा
णैश्चाभिषिक्तो यजमानाभिषेकवस्त्रमाचार्य्याय निवेद्यान्यमवेष्ट्य पूर्णाहुतिं कृत्वाचार्य्याय धे
नुवस्त्रयुग्माङ्गुलीयकादिकं त्विग्भ्यश्च दक्षिणां दत्वान्येभ्यश्च भूरिदक्षिणां दत्वा शान्तश

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

त्याबा ब्राह्मणान् भोजयित्वा बंधुभिः सह भुंजीतेति वेधृतिव्यतीपातसंक्रांतिशांतयः अथैकनक्ष
त्रजन्मशांतिः गर्गः एकस्मिन्नेव नक्षत्रे भ्रात्रोर्वा पितृपुत्रयोः प्रसूतिश्चेत्तयोर्मृत्युर्भवेदेकस्य
निश्चयः तद्दोषनाशाय तदा प्रशस्ता शांतिं च कुर्यादभिषेचनं च सम्पूज्य ऋक्षप्रतिमां तदग्रे दानं
च कुर्याद्विभवानुरूपम् तत्र शांतिं प्रवक्ष्यामि सर्वाचार्यमतेन तु शुभर्क्षे शुभवारे च चंद्रताराब
लान्विते रिक्ताविष्टी विवर्ज्येव शुभारंभे द्विभवे सुधीः आचार्यं वरयेत्पूर्वं चतुरश्च द्विजोत्तमान्
पुण्याहं वाचयित्वा तु शांतिकर्म समाचरेत् अग्नेरीशानदिग्भागे नक्षत्रप्रतिमां ततः तन्नक्षत्रो
क्तमार्गेणाभ्यर्च्य येत्कलशोपरि रक्तवस्त्रेण संछाद्य वस्त्रयुग्मेन वेष्टयेत् स्वशाखोक्तेन मार्गे
ण कुर्यादग्निमुखं ततः अनेनैव तु मंत्रेण हुनेद्धोत्तरशतम् प्रत्येकं समिदन्नाज्यैः प्रायश्चि
त्तांतमेव च अभिषेकं ततः कुर्यादाचार्यः पितृपुत्रयोः वस्त्रालंकारगोदानैराचार्यं पूज
येत्पुनः ऋत्विजां दक्षिणां दद्यात् माषत्रयसुवर्णकम् देवताप्रतिमादानं धान्यवस्त्रादिभि
स्सह यानशय्यासनादीनि दद्यात् दोषशांतये भोजयेद्ब्राह्मणान् सर्वान् वित्तशाठ्यविवर्जि
तः अथ प्रयोगः कर्त्ता मासपक्षाद्युल्लिख्यास्य शिशोः पित्राद्येकर्क्षोत्पत्तिसूचितारिष्टशांत्य
र्थमेकनक्षत्रशांतिं करिष्ये॰ इति संकल्प्य॰ गणेशपूजनस्वस्तिवाचनाभ्युदयिकाचार्यर्त्विग्वरणमास्त

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

अथाचार्य्योग्नेरीशान्यां कुंभं संस्थाप्य रक्तवस्त्रयुग्मेनाच्छाद्य तस्मिन्पूर्णपात्रोपरि तन्नक्षत्रोक्तमंत्रेण प्र
तिमायां तन्नक्षत्रं तद्देवतां वा वाह्य संपूज्याऽग्निं प्रतिष्ठाप्यान्वाधायाज्यभागांते कृत्वा तन्नक्षत्रमंत्रेण स
मित्त्वर्बीज्यानि प्रत्येकमष्टोत्तरशतं हुत्वा होमशेषं समाप्य शिशुन्तत्पित्रादीं स्वाभिषेकः तेन कुंभीनर
पूजां कृत्वा विसृज्य प्रतिमादिकं गवादिं वाचार्य्याय दत्वान्यत्विग्भ्यश्च प्रत्येकं सौवर्णमाषत्रयात्मिकाम्
यथाविभवं यानशय्यासनादीनि च दत्वा ब्राह्मणान्भोजयित्वा स्वयं भुञ्जीत इत्येकनक्षत्रशांतिप्रयोगः
अथ ग्रहणोत्पन्नो शांतिः शौनकः ग्रहणे चंद्रसूर्य्यस्य प्रसूतिर्यदि जायते व्याधिपीडा तदा स्त्रीणामा
दौ तु आन्तु दर्शनात् इत्यंसज्ञा येनयस्तु तस्य मृत्युर्न्नसंशयः व्याधिपीडा च दारिद्र्य शोकश्च कलहो भवे
त् शांतिं तेषां प्रवक्ष्यामि नराणां हितकाम्यया यस्मिन्नृक्षे विशेषेण ग्रहणं संप्रजायते तदृक्षाधिपतेः
रूपं सुवर्णेन प्रकल्पयेत् यथाशक्त्यनुसारेण वित्तशाठ्यं न कारयेत् सूर्य्यग्रहे सूर्य्यरूपं सुवर्णेन वि
शेषतः चंद्रः चन्द्रग्रहे धीमान्रजतेन विशेषतः राहुरूपं प्रकुर्वीत नागेनैव विचक्षणः शुचौ देशे प्र
यत्नेन गोमयेन प्रकल्पयेत नागेन सीसेन तस्योपरि न्यसेद्धीमान्नववस्त्रं सुशोभनम् त्रयाणां
चैव रूपाणां स्थापनं तत्र कारयेत् रक्ताक्षतं रक्तगंधं रक्तपुष्पाम्बराणि च सूर्य्यग्रहे प्रदातव्यं सूर्य्य
प्रीतिकराय च श्वेतवस्त्रं श्वेतमाल्यं श्वेतगंधाक्षतादिभिः चंद्रग्रहे प्रदातव्यं चंद्रप्रीतिकराय च

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां॰मं॰ ६६ गृहवे चैव दानं च कुसुमपुष्पाम्बराणि च दद्यान्नक्षत्रनाथाय श्वेतगन्धानुलेपने सूर्य्यं संपूजयेत् मंत्रः
चंद्रग्रहे च पालाशैः समिद्भिर्जुहुयान्नरः दूर्वाभिर्जुहुयाद्धीमान् राहोस्तु शीघ्रनाशाय च समिद्भिर्जु
लदक्षौ त्येर्ग्रिशाय जुहुयाद्बुधः भेशाय नक्षत्राधिपतये आज्येन चरुणा चैव तिलैश्च जुहुयात्ततः
पञ्चगव्यैः पञ्चरत्नैः पञ्चत्वक्कांचपल्लवैः जलैरौषधकल्कैश्च सहितैः कलशोदकैः औषधकल्कैः
सर्वौषधिकल्कैः अभिषेकं प्रकुर्वीत यजमाने प्रयत्नतः मंत्रैर्वरुणदैवत्यैरापोहिष्ठादिभिस्त्रि
भिः इमम्मे गङ्गे पितरस्तत्वायामीति मंत्रकैः अभिषेके निवृत्ते तु यजमानः समाहितः आचार्य्यं पू
जयेत्पश्चात्सुशांतो नियतेंद्रियः तस्मै दद्यात्प्रयत्नेन भक्त्या प्रतिकृतित्रयम् दक्षिणाभिश्च संपूज्य य
थाशक्त्यनुसारतः ब्राह्मणान्भोजयित्वा तु प्रणिपत्य क्षमापयेत् तेभ्योपि दक्षिणां दद्याद्यजमानः
समाहितः अनेन विधिना शांतिं कृत्वा सम्यग्विशेषतः अकालमृत्युशोकघ्नं व्याधिपीडां न चाप्नु
यात् सौख्यं सौमनसं नित्यं सौभाग्यं लभते नरः इत्यङ्कहरणजातानां सर्वारिष्टविनाशनम् कथि
तम्भार्गवेणेदं शौनकाय महात्मने इति चंद्रसूर्य्यग्रहणप्रसूतिशांतिः अथ विषघटिकाशांतिवि
धिः तत्र वृद्धगार्ग्यः विषनाडीषु संयाताः पितृमातृधनात्मनाम् नाशकाः द्विपशार्द्दूलाद्यैः क्रूरल
ग्नेऽष्टमेपि वा तद्दोषपरिहाराय शांतिकर्म समारभेत् रुद्रोयमोऽग्निर्मृत्युश्च देवताः परिकीर्तिताः॥ राम: ६६

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

सुवर्णेन यथाशक्त्या तत्तल्लक्षणसंयुताम् प्रतिमां कारयित्वा तु स्नात्वा आढकव्रीहिभिस्स्थले स्थण्डिलम्प्र
कल्प्याथ कुम्भमोषधिसंयुतम् जलैः संपूज्य संस्थाप्य मृदादि प्रक्षिपेत्ततः वस्त्रद्वयेन संवेष्ट्य पञ्च
रत्नानि निक्षिपेत् कुम्भोपरि तु संस्थाप्य च ततस्तु प्रतिमां तथा तत्तन्मन्त्रैश्च संपूज्य गन्धपुष्पोपहारकैः
कद्रुद्रायेति मन्त्रेण यमाय सोममित्यथ अग्निमूर्द्धेति मन्त्रेण परं मृत्योरितिच्च एतैश्चतुर्भिर्मन्त्रै
स्तु क्रमाद्द्रव्यैर्हुनेत्तथा समिच्चरुस्तन्द्रव्यैः प्रत्येकं च यथाक्रमम् आत्विग्भिश्च सहाचार्य्यो हुनेद
ष्टसहस्रकम् अष्टोत्तरशतं वाथ अष्टाविंशतिमेव वा ततस्तिलैर्हुनेद्द्वा तत्तन्मन्त्रैश्च कल्पवित्
ततोऽभिषिञ्चयेदेनं मन्त्रैः पौराणिकैः क्रमात् प्रार्थ्यतां भगवानीशः पिनाकी सर्वतोमुखः तवमू
र्त्तिप्रदानेन समस्ताभीष्टदो भव इत्यग्नीनायम ॥ कालो दण्डहस्तः प्रशान्तदः रक्तदंष्ट्राशमृत्कृष्टो
महिषस्थः शिवं कुरु पिङ्गलश्मश्रुकेशान्तः पिङ्गाक्षश्चतुरोरणः छागस्थः साक्षसूत्रश्च समार्च्चिः
शक्तिधारकः तवमूर्त्तिप्रदानेन मम पापं विनाशय दंष्ट्राकरालवदनो नीलाञ्जनसमाकृतिः ध
कुरवज्रगदापाणिर्मृत्युर्मां पातु सर्वदा इत्थमेवंविधैर्मन्त्रैर्यथाविधिसमाहितः गोभूहिरण्यवस्त्रै
श्चाचार्य्यं पूजयेत्सुधीः एवं कुर्य्यात्प्रयत्नेन क्षिप्रं दोषः प्रशाम्यति इति विषघटीशान्तिः अथ
भगण्डान्तशान्तिः गर्गः अश्विनी मघ मूला सौत्रिवेदनवनाडिकाः रेवती सर्प्प संक्रान्तामासरुद्रर
सा ॥ क्रमात् अश्विनीमघमूलादौ नाडिकाद्वितयं तथा अश्विनीमघमूलानां पूर्वार्द्धे बाधते पिता ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां.म. ६७ ष्वादि सर्प्पपश्चार्द्धे जननी बाध्यते शिशोः पितृघ्नश्च दिवाजातो रात्रिजातस्तु मातृहा आत्महा संध्ययोर्ज्जातो
नास्ति गण्डे निरामयः सर्वेषां गण्डजातानां परित्यागो विधीयते वर्जयेद्दर्शनं यावत् षण्मासिकम्भ
वेत् तस्य शांतिं प्रवक्ष्यामि सोममंत्रेण भक्तिमान् कांस्यपात्रं प्रकुर्वीत पलैः षोडशभिर्न्नवम् अथवाप्यष्टभि
श्चतुर्भिर्वा द्वाभ्यामथ शोधनं तथा तन्मध्ये पायसं शुभ्रं नवनीतेन पूरितम् राजतं चन्द्रमं चैव तस्मिन्पुष्पस
हस्रकैः देवज्ञः क्षौमवासाश्च शुक्लमाल्यावरांचितः सोमोहमिति संचिंत्य पूजां कुर्य्यादतन्द्रितः जप
त्सहस्रकं मन्त्रं श्रद्दधानः समाहितः आप्यायस्वेति मंत्रेण पूजां कुर्यात्समाहितः दद्याद्द्विजाय
मिष्टां गण्डदोषप्रशांतये शुक्लां वागीश्वरञ्चैव ताम्रपात्रसमन्वितम् गण्डदोषोपशान्त्यर्थं दद्याद्वेद
विदे शुचिः इति भगण्डान्तशान्तिः अथ दिनक्षयादिशान्तिः गर्गः दिनक्षये व्यतीपाते व्याघाते विष्टि
वैधृतौ मूले गण्डे तिगण्डे च परिघे यमघण्टके कालदण्डे मृत्युयोगे दुष्टयोगे सुदारुणे तस्मिन गण्ड
दिने प्राप्ते प्रसूतिर्यदि जायते अतिदोषकरी प्रोक्ता तत्र पापयुते सति विचार्य्य तत्र दैवज्ञः शांतिं कृत्वा
यथाविधि यजमानो देवतानां च ग्रहाणाञ्चैव पूजनम् दीपं शिवालये भक्त्या घृतेन परिदापयेत् अ
भिषेकं शंकरस्य च अश्वत्थस्य प्रदक्षिणाम् आयुर्वृद्धिकरं ज्ञाप्यं सर्वारिष्टविनाशनम् गुरुदेवतविप्रा
णां पूजनं गोत्रवर्द्धनम् पुष्ट्यायुस्तुष्टिशान्त्यर्थमभीष्टफलसिद्धये सर्वारिष्टहरार्थाय ग्रहयज्ञं समाचरेत् राम: ६७

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शिवायविधिवद्भक्त्यादीपदानं करोति यः अखण्डं गोष्ठते नैव सवै मृत्युञ्जयेन्नरः सर्वसंपत्समृद्ध्यर्थ
नित्यकल्याणवृद्धये अभीष्टफलसिद्ध्यर्थं कुर्य्याद्ब्राह्मणभोजनम् अभिषेकं शिवे शान्तिं कृत्वा भक्त्या
नरोत्तमः अकालमृत्युन्निर्ज्जित्य दीर्घायुर्जायते नरः गणपत्यं पुरुषसूक्तं सौरं मृत्युञ्जयं शुभम् शा
न्तिजाप्यं रुद्रजाप्यं कृत्वा मृत्युञ्जयो भवेत् मूले वा सर्प्पगण्डे वा कुर्य्यादेतानि यत्नतः आयुर्वृद्धिक
रार्थाय गण्डदोषप्रशान्तये इति गर्गोक्तगण्डजननशान्तिः अथ त्रिक शान्तिः शान्तिसर्वस्वे सुत
त्रये सुता चेत्स्यात्तत्रये वा सुतो यदि मातापित्रोः कुलस्यापि तद्धानिर्म्महद्भवेत् ज्येष्ठनाशो धने
हानिर्दुःखं वा सुमहद्भवेत् तत्र शान्तिं प्रकुर्वीत वित्तशाठ्यविवर्ज्जितः जातस्यैकादशाहे वा द्वाद
शाहे शुभे दिने आचार्य्यमृत्विजो वृत्वा ग्रहयज्ञपुरस्सरम् सदेवा ग्रहयज्ञस्यान्तस्यापि विनानु
सारतः ब्रह्मविष्णुमहेशेन्द्रप्रतिमाः स्वर्णनिर्म्मिताः पूजयेद्धान्यराशिस्थकलशोपरि शक्तितः
पञ्चमे कलशे रुद्रं पूजयेद्रुद्रसंख्यया रुद्रसूक्तानि चत्वारि शान्तिसूक्तानि सर्वशः द्विजएको
जपेद्धोमकाले शुचिसमाहितः आचार्य्यो जुहुयात्तत्र समिदाज्यतिलांश्चरुम् अष्टोत्तरसह
स्रं वा शतं वा विंशतिं तु वा देवताभ्यश्चतुर्वक्त्रादिभ्यो ग्रहपुरस्सरम् ब्रह्मादिमैत्रैरिन्द्रस्य यतइ
न्द्रभयामहे ततः स्विष्टकृतं हुत्वा बलिं पूर्णाहुतिं ततः अभिषेकं कुटुम्बस्य कृत्वाचार्य्यम्प्र

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

कृ२

शां॰म॰ हिरण्यन्धेनुरेकाच मन्विजान्दक्षिणाततः प्रतिमागुरवे देया उपस्करसमन्विता कांस्यास्यवी
६८ क्षणां दत्वा शान्तिपाठन्तु कारयेत् ब्राह्मणान्भोजयेच्छक्त्यादीनानाथांश्च तर्प्पयेत् एवं शान्तिवि
धानेन सर्वारिष्टं विलीयते इति त्रिकशान्तिः अथ प्रसववैकृतशान्तिविधिरुच्यते अकालप्र
सवानार्य्यः कालातीतप्रजास्तथा विकृतप्रसवाश्चैव युग्मप्रसवनास्तथा अमानुषा अख
ण्डाश्च अजातव्यञ्जनास्तथा हीनाङ्गा अधिकाङ्गाश्च जायन्ते यदि वा स्त्रियः पशवः पक्षिण
श्चैव तथैव च सरीसृपा विनाशन्तस्य देहस्य कुलस्य च विनिर्द्दिशेत् निर्वासयेत्तान्नृपतिस्व
राष्ट्रात्स्त्रियश्च पूज्याश्च ततो द्विजेन्द्राः चिकित्सनैर्ब्राह्मणतर्प्पणैश्च ततोस्य शान्तिसमुपैति
पापम् अथ यमलजातशान्तिविधिः अत्र ब्राह्मणं तदाकुर्य्य आहिताग्निर्यस्य भार्य्या गो
वीयमौ जनयेत्का तत्र प्रायश्चित्तिरिति सोग्नये मरुत्वते त्रयोदशकपालम्पुरोडाशं निर्व्वपे
तस्य याज्यानुवाक्ये मरुतो यस्य हि क्षये राइवेदूचरमा अहवेन्साकूतिं हवनीयेञ्जुहुयादय
पेमरुत्वते स्वाहेति सा तत्र प्रायश्चित्तिरिति कारिका अथ यस्य वधूर्गावी जनयेद्व्य घमौ नतः
समरुद्भ्यश्चरुं कुर्य्यात्स्वस्मी जुहुतिमथापि वेति मदनरत्ने योगसागरे प्रथमे हनि गृहे कन्या राम॰
ति बालकन्या लैनीगृहे पापिनी ग्रहीतिनारायणीयपाठः गंधिनीति गुणोत्तरे तथा ६८

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

गृहीतमात्रस्य चेष्टितान्युपलक्षयेत् गात्रोद्वेगो निराहारो लालाग्रीवा निवर्त्तनम् लिम्पेत धातकीलोध्र
मञ्जिष्ठा नालचन्दनैः धूपयेन्महिषाक्षेण ततो मुञ्चति सा ग्रही लेपनधूपने बालस्य नारायणीये
बलिदानानुवृत्तौ मत्स्यमांससुराभक्ष्यगंधास्रक्कुधूपदीपकैः बलिन्द्याद्दिति शेषः बलिमन्त्रः
प्रयोगसागरे ॐ नमश्चामुण्डे भगवति विघुञ्जिके ह्रां२ ह्रीं२ अपसरन्तु दुष्टग्रहा हुं तद्यथा गच्छ
नु पातान्यतः स्थाने रूद्रो ज्ञापयेत्स्वाहा विघुञ्जिके ह्रां ह्रीं हुं हुं मुञ्च मुञ्च स्वाहेति बालग्रहाणां
विधेयं शस्ता बलिनिवेदने बलिश्च खेरुदयस्तेदिनाद्वादेयः बलिस्थानानि प्रयोगसागरे
कदम्बश्चकरंजश्च विनीतनिवस्तथा अश्वत्थोडुम्बरश्चैव श्लेष्मातकवटौ तथा मातृवृक्षाः क्रमे
णोक्ताः पूर्वादीशान्तदिग्गताः तेषामेकं समाश्रित्य बलिं दद्याद्यथादितः प्रतिस्थूलमप्र
सुद्दकं प्रति वृक्षमथापि वा स्थूलतरम् क्वचित्तु कूलमित्येव पाठः अत्राशायामनुक्तायां प्रा
कृतोक्तान्नानुसारतः यत्र वा रोचते तत्र मातॄणां बलिमाहरेत् क्वचानी राजनां तं बलिमिति
विधिवद्बालमाहूय संस्पृश्य पाणिना तत्सर्वगात्रं शिरसि सकुसुमैरक्षतैर्मन्त्री मथितं वांक्षिप्त्वा
ग्ने देवताया विधिवदुपहितैस्तत्र गीतैः सुमंत्रैः कुर्य्याद्रक्षां समीक्ष्य क्षपासराणामिव विलयं याति

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां·म·
६९

नीराजनमंत्रोद्धारो नारायणीये ब्रह्माविष्णुश्च रुद्रश्च स्कंदो वैश्रवणस्तथा रक्षंतु त्वरितं बालं मुञ्च मु
ञ्च कुमारकम् कालगुरुणान्तरे पलाशाश्वत्थकपित्थविल्वोदुम्बरपल्लवाः पञ्चभागाः स्मृता ह्येते बा
लानां हितकारकाः स्नापितं भूर्बितन्वालन्ततो मुञ्चति साग्रही प्रयोगसारेपि पलाशोदुम्बराश्व।
त्थविल्वन्यग्रोधपल्लवाः क्वथितेन कषायेन परिषिञ्चेत्प्रशान्तये परिषिञ्चेत्स्नापयेदिति मदनः
अत्र मंत्रः ॐ नमश्चामुण्डे इत्यादिवलिदानेऽपि मुक्तः रक्षामंत्रः प्रयोगसारे रक्ष रक्ष महादेव नील।
ग्रीव जटाधर ग्रहैस्तु सहितो रक्ष मुञ्च मुञ्च कुमारकम् अमुम्मन्त्रम्भूर्जपत्रे विलिख्य तत्पत्रं भुजे
बध्नीयादिति मदनः सबालकशिखास्पर्शपूर्वकं जपमन्त्र उक्तः प्रयोगसारे ॐ सर्वमानरइमेघ
हंसहरनुक्रोदय· स्फोटयस्वाहा· गर्ज २ सरगृह्ण २ श्रामर्दय २ हिम २ हन २ एवं सिद्धिरूपो ज्ञाप
यति स्वाहा अत्र होमोपि प्रयोगसारे ॐ कूष्माण्डे भगवति सुरगिरिणा सतु रिपुं तं मुञ्च देहस्य चूरस
२ गच्छ स्वाहा २ हुत्वा चतुष्पथे कुर्याद् मंत्रगणेन मन्त्रवित् त्रिरात्रं पञ्चरात्रं वा सहस्रं जुहु
यात्तिलैः यांति दुष्टग्रहाः शांतिं बलिनाचानुमोदिताः बालरोदनपरिहारार्थं यन्त्रमुक्तं प्रयोगसा
रे षट्स्त्रमध्ये ह्रींकारस्तन्मध्ये शिशोर्नाम विलिख्य षट्सु अस्रेषु ॐ लुलु व स्वाहेति मंत्रस्य षड
क्षराणि विलिख्य तद्बहिर्नेमिवह्नित्रयं विलिख्य तद्बहिरधोमुखैरर्धचंद्रैरावेष्ट्य पञ्चोपचारैः संपू
ज्य बालहस्ते बध्नीयादिति अथ बालग्रहस्तवः प्रयोगसारे प्रणम्य शिरसा शान्तं गणेशानन्न

श्रीरामः
६९

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

वालग्रहस्सर्वं वक्ष्ये समस्ताभ्युदयप्रदम् तपसायशसाक्षीत्वावपुषाविक्रमेणवा निर्दिष्टोयः सदास्कंधः
सनोदेवः प्रसीदतु रक्तमाल्याम्वरधरो रक्तगंधानुलेपनः रक्तादित्योज्वलः शांतः सनोदेवः प्रसीदतु
योनन्दनः पशुपतेर्म्मार्त्तण्डपावकस्यच गङ्गामाल्लतिकानांच सनोदेवः प्रसीदतु देवसेनापरिवृ
तोदेवसेनार्च्चितस्सदा देवसेनापतिः श्रीमान्सनोदेवः प्रसीदतु सशक्तः शक्तिधरः हरः शिखराडी
शिखिवाहनः सुरारिहामहासेनः स० मल्लन्यासुन्दरो दांतोदेवैश्वर्य्योदयान्वितः नानाविनोद
सम्पन्नः स० प्रवोधासुप्रवोधाच वोधनासुप्रवोधना प्रवुद्धाचप्रवोधाच सुप्रीतासुमनास्तथा
मनात्मनीति विख्याता योगिन्यः पांतुवालकम् सुघ्नतारक्तिमणीचैव मन्दवेगाविभीषणा वि
घुज्जिका महानासा शृनानंदा तथापरा वालदाप्रमदाचेति योगिन्यः पांतु० सुद्धाविशुद्धाश्र
द्धाचयोगासिद्धामितवदा सुभगासुभद्रागौरीवलाविकारिणीतिच नानाविज्ञानविख्याता
योगिन्यः पांतु० लम्वाप्रलम्वाचतथालम्वकर्णीचलम्बिका ज्वालाकरालीकालिन्दीका
लिकेतियथोदिताः स्वच्छंदाचारसम्पन्नायोगिन्यः पांतु० प्रणीतासुप्रणीताच मलिनीवि
स्वमालिनी विमलाकमलामालीलीलारोद्रीचविस्वदा विचरन्त्योयथाकामंयोगिन्यः पां
तुवालकम् वायुवेगामहावेगासुवेगावेगवाहिनी शृङ्खिनीहसिनीहृष्टिः पुष्टिकासिद्धि

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां०म० दिव्यानुभावावाहिन्योयोगिन्यःपांतु० भ्रमिनाभ्रामिनीनित्यानिर्म्मिन्नासुभगग्रगुहा क्लेदिनीद्रा
७० विरणीवामा योगिन्यः पांतु० रुद्रशक्ति विनिष्क्रान्तमेकाशीतिक्रमोदितम् योगिनीवृन्दमेत
द्धि सिद्धविद्याधरार्च्चिता स्कंदग्रहाधिदेवन्तद्वालकम्पान्तु सर्वदा शङ्कुनारेवतीदेवीशिखाच
मुखमण्डिका प्रलंवा पूतनाख्याचकटपूतनिकापुनः विजयागोमुखी धूम्रामुरुण्डभालान
याघरा अघोलेवाचपद्माचकुमुदाप्पधवांचिका नागिनीचैवकालीचदेवीप्रेतमुखीतथा
ऐन्द्रीमार्जारिकाभूषकुरंगीच भुमाहूशा कालरात्रिश्चमायाचलोहितापिलिपिच्छिका भी
तारणीचक्रवाहाभीषणादुर्जयापरा तापनीकटकोलीचमुक्तकेशीमहावला अहंकारी
जयानन्दजमेधात्रिदंडिका रोदनीमुकुटाभिख्याललाटपिङ्गलातथा शीतलावालिनीचे
वनापक्षीपापराक्षसी मानसाधनदादेवीवलनावर्त्तिनीतथा यमुनाजातवेदाचमालिनी
कलहंसिनी वालिकादेवदूतीचवायसीपक्षिरीणीतथा स्वच्छन्दापालिकाचैववासिनीचावि
केतिच पञ्चाशन्नुकुलोत्पन्नाचतुष्षष्ठिसमीरिताः योगिन्योनित्यसंतुष्टास्स्कंदापस्मार
नी२ देवताः नारंग्राधिकारस्थावालकम्पान्तु सर्वदा महालक्ष्मीर्म्महातेजामहासेनामहावला एम:
महाकंपामहाभीमामहातेजामहोत्सवा महासेनामहाचण्डामोहिनीवीरनायका एक ७०

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

वीरा विशालाक्षी सुकेशी सुमना तथा सुकेशिनी च संतुष्टा दंष्ट्रिणी च विलम्बिनी भामिनी चाथ सौव
र्णी सिंहवक्त्राकरङ्किनी भ्रमरा च स्वला च स्पष्टा सिद्धिदा च तथापरा शाकोदरी धृतिः स्वाहा स्वधा
ख्याता च सनातनी शंबरा च तथा देवी नीलग्रीवा नमद्योविका वितला गन्धिनी वामा माकाङ्क्षी चैव वा
हिनी कार्बरी मालती फुल्ल कालकर्णी च चर्चिका चित्रानना गुहा चेति पार्वती संगतिर्ग
ता पञ्चाशन्नव संपन्ना शकुना देवतप्रिया योगिन्यः कामरूपिरो पान्तु बालकं सर्वदा
विश्वं तपा प्रभा वज्रा सर्वज्ञा सर्वगा गुहा दुर्गा सरस्वती ज्येष्ठा श्रेष्ठा पद्मा परापरा प्रमदा रो
हिणी सीता प्रज्ञा प्रज्ञा दिना विभा विभूतिर्विनतिः प्रीतिः प्रकृतिः प्रमतिर्यदा एता भ
गवता सृष्टा योगिन्यो योगसिद्धिदाः पञ्चविंशतिराख्याता रेवती शक्तिगोचरा जगत्प्या
यनकरा बालकं पान्तु सर्वदा नन्दश्चैवोपनन्दश्च गोमतिः सुमतिस्तथा विघुज्जिह्वो महाका
लः करालस्त्रिलोचनः नैजहोडा विरूपाक्षो गोमुखो वडवामुखः कालाननः करालश्च श
ङ्कुकर्णो विभीषणाः एते स्कन्देनोत्पन्ना वीराः बोडशराक्षसाः पूतनादेवता पुष्टा बा
लकं पान्तु सर्वदा वज्रिणी शक्तिनी वाण्या दंष्ट्रिणी खड्गिनी तथा पाशिनी ध्वजिनी दे
वी गदिनी शूलिनी परा पद्मिनी चक्रिणी चेति सर्वाकाराभयप्रदा एता या निर्मिता दे
व्या योगिन्यो देवकीर्तिताः आधिभूतप्रधाना या पापायात्साप्शानसूतना प्रसन्ना मातरः

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां·भ· सर्व्वावालकम्पातुसर्वदा अर्थकोजलकोभूमा उग्रस्कन्दश्चकीर्त्तितः वारेशाःपितृभिःसहस्थाने
७१ ज्ञमेषाधिदेवताः येचशक्तिप्रधानास्तेवालकम्पांतुसर्वदा भैरवाश्चैववीराश्चक्षेत्रपालावि
नायकाः डाकिन्योरुद्रशाकिन्योयक्षरक्षांसिपन्नगाः चराश्चापांतराभूतामनुष्याःपशवो
मृगाः सरीसृपाश्चसंतुष्टावालकम्पान्तुसर्वदा आदित्यावसवोरुद्राःपितरोमरुतस्तथा
मुनयोमनवःकालाग्रहयोगाःसनातनाः सिद्धास्साध्याश्चगन्धर्वादेव्यश्चाप्सरसांवराः
विद्याधरामहादैत्यावालकम्पान्तुसर्वदा सहजौजोगजाश्चैववीरजामंत्रजातथा योगिन्यो
योगवनिता नानाविभवगोचराः भवानीमेसंतुष्टावालकम्पान्तुसर्वदा भूर्ल्लोकेभुव
र्ल्लोकेस्वर्ल्लोकेयांचमातरः अधश्चोर्द्ध्वञ्चतिर्य्यक्चक्रीडन्त्योननुमूर्त्तयः प्रसन्नयोगस
म्पन्नादिव्यैश्वर्य्यसमन्विताः स्वच्छन्दपदसंभूतभैरवैःपरिवारिताः रक्षन्तुवालक
म्प्रीताःशान्तिर्भवतुचेतसा दिव्यस्तोत्रमिदम्पुण्यम्वालरक्षाधिकारकम् जपेत् राम:
सन्तानरक्षार्थंवालद्रोहोपशान्तिदम् इतिवालस्तवः ॥ ॥ ॥ ॥ ॥ ७१

व६

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

इत्यञ्चस्तिवान्तकृत्यमाघमाससर्वयोर्द्वितीयादिदिनमाससर्वेष्वपिकार्य्यम्विशेषस्तूच्यते
कुमारतन्त्रे प्रथमेदिवसेमासेवर्षेवायोगिनीसदा अथवानन्दिनीनामापूतनानाम्नामत
शिशुम् तज्गृहीतस्यबालस्यज्वरस्स्यात्प्रथमन्ततः गात्रशोषश्चवैवर्ण्यपन्नाहारेच्छा
भृशाभवेत् छर्द्दिर्मूर्च्छाचकंपश्चहीनज्वरयुतस्तथा विधानन्तत्रवक्ष्यामियेनमुच्य
तिपूतना नदीमृत्तिकयाकुर्य्याच्छुभनाडत्रिकान्ततः शुक्लोदनञ्चस्त्रगन्धस्तथाग
न्धानुलेपनाम् शुक्लपुष्पाणिवैपञ्चध्वजाःपञ्चप्रदीपकाः स्वस्तिकाःपञ्चपूर्वा
क्रोपूर्वस्यादिशिसंयुतः बलिंदद्यात्प्रदोषेस्तसर्वपापहरामेवच शिवनिर्म्माल्यमार्ज्जार
नृकेशानिंबपत्रकम् गव्यघृतञ्चेत्यनेनधूपयेच्चैवबालकम् एवंदिनत्रयंकृत्वाचतु
र्थेशांतिवारिणा स्नापयेद्बालकपश्चाद्भोजयेच्चापिभिक्षुकम् क्षीरेणभोजयेदेवं
सुस्थोभवतिबालकः शांतिवारिणेति शन्नइन्द्राग्नीशान्नोभवतिइत्यादिकैः स्व
स्वसारवापठितेर्मन्त्रैरभिमंत्रितंवारिशांतिवारि अथवावक्ष्यमाणमंत्रेणशांतक

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

यवानां सकलानि वह्निपक्वानि श्रोदनवत् ५

शां॰ म॰ त्वोनिर्मंत्रितमवारिं शांतिवारि द्वितीयेदिवसे मासे हायने वा सुनन्दना गृह्णाति पूतनावालं यो
७२ गिनी स्वस्तनापिवा ततो भवेज्ज्वरः पूर्वं संकोचो हस्तपादयोः दन्तान्खादन्तः प्रनिशं निमीलय
ति चक्षुषी आहारन्न च गृह्णाति दिवारात्रं रोदति अक्षिरोगं छर्दनं च भवेत्तीतः पुनः पु
नः कृशत्वञ्च प्रजायते तच्छ्रुत्वेतच्छिद्रुलक्षणम् तण्डुलप्रस्थपिष्टेन विनिर्माय यार्थ पुत्रिकाम् त्र
याद्दशध्वजा दीपास्त्र स्वस्तिकायं वलोदनाः प्रस्थप्रमाणपिष्टेन सिद्धा पूपाश्च मत्स्यकाः मांसं
चैतनेतदखिलपश्चिमायां दिशि क्षिपेत् पश्चिमायां च सन्ध्यायामेतद्दद्या दिनत्रयम् धूपशान्ति
स्नानब्राह्मणभोजनानि पूर्ववत् तृतीये दिवसे मासे वर्षे वा पूतनाभिधा गृह्णीयाद्यद्योगिनी
वालं ततः पूर्वं ज्वरं भवेत् प्रस्थप्रमाणपिष्टेन पुत्रिकाङ्कारयेत्ततः रक्तौदनं ध्वजो रक्तः स्वस्ति
का रक्त एव च रक्तपुष्पं रक्तगन्धस्तथा रक्तानुलेपनम् पश्चिमायां च सन्ध्यायामुदीच्यां निक्षि
पेद्वलिम् धूपशान्तिस्नानब्राह्मणभोजनानि पूर्ववत् चतुर्थे हनि मासे तु वर्षे गृह्णाति वा
लकम् मुखमण्डनिकानाम पूतनावाथ योगिनी विभीषणाख्याततस्य प्रथमं ज्जायते ज्व
रः गात्रभङ्गास्थिति मूर्च्छा वैवर्ण्यं चाक्षिमीलनम् वैकल्पश्वासमताश्वासहकासोर्ध्वाशिरसी रामः
७२

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

गिनम् तेन पिष्टमये ॥ कृत्वा पुत्रिकां विल्वकण्टकैः अष्टाङ्गं मर्द्दयेत्पुष्पं युक्तं कृष्णध्वजोऽर्जुनः
स्वस्तिकेऽर्द्ध प्रस्थास्सिद्धमन्नं जलं तावद् दश धूपकाः त्रिसन्ध्यम्पश्चिमास्यायां बलिं दद्यात्प्रयत्नतः ता
वद् धूपकाः इति अर्द्ध प्रस्थ परिमितेनान्नेन कृताऽन्यार्थः गोशृङ्गं सर्षपं निम्बं कं लशुनं नालिव
पत्रकम् मनुष्यकेशमार्ज्जारिलोमान्यजं तु तन्नथा एतैश्च धूपयेद्देकेनिशि प्रासध्यात्रयेपि वा
एकनिशि एकस्मिन्नेव दिने बलिरित्यर्थः शान्तिस्नानं ब्राह्मणभोजनानि पूर्ववत् एवं पञ्च
मे दिवसे मासे वर्षे वा पूतनाशिशुम् विडालिकाख्या गृह्णाति प्रथमं ज्ञायते ज्वरः हिक्काश्वा
सश्च शूलं च गात्रभङ्गोरुचिस्तथा तण्डुलप्रस्थपिष्टेन निर्म्माय याथ पुत्रिकाम् शुल्लोद
न ध्वजाः पञ्च स्वस्तिकाः पञ्च कोज्वलाः पञ्च दीपाश्च बल्लानि कुम्भमानि च चन्दनमे
प्यपराह्णे वृक्षमूले पश्चिमायां दिशि क्षिपेत् धूपस्तु गोशृङ्गं लशुनमित्यादिकं शान्तिस्नान
मत्र ब्राह्मणभोजनानि च पूर्ववत् षष्ठे हनि तथा मासे हायने वापि बालकम् पूतनाशकु
निर्नामगृह्णाति याति तदनन्तरम् ज्वर उद्वेदना गात्रशोषश्श्वासारुचिस्तथा कासश्च हस्त
पादाक्षिसङ्कोचश्चेति लक्षणम् तण्डुलप्रस्थपिष्टेन विनिर्म्माय याथ पुत्रिकाम् कृष्णोदने

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां०म० ध्वजाः पञ्च च कुम्भास्स्वस्तिकाः पञ्च कम् कुम्भमेवाथ मत्स्यांश्च पायसं दुग्धमेव च मांसं वा पूपकास्त्वर्द्ध
७३ प्रस्थपिष्टविनिर्म्मिताः अपराह्णे पश्चिमायां निक्षिपेद्बलिपत्रिकाम् पत्रिकापूर्ववत्कृत्वा पललशष्कु
लपादिनम् मत्स्यापर्प्पटिकाश्चैव रक्तान्नं च प्रस्थसम्मितम् उदीच्यां पूर्वसन्ध्यायां बलिर्देयः प्रशा
न्तये अत्र बलिदानयोर्विकल्पः तयोरेव कालयोर्बालकस्य धूपो देयः गोशृङ्गलशुनमित्यादिकैः
तथा शान्तिस्नानं ब्राह्मणभोजनं च बलिदाने पूजायां तु मन्त्रः ॐ फट् फट् स्वाहा सप्तमे दिव
से मासे वर्षे वा शुष्करेवती गृह्णाति पूतनाबालं तेन तस्याः प्रथमं ज्वरः गात्रभङ्गो यथा विद्धेन आ
हारे कूपरोदने इत्येतल्लक्षणं तत्र बलिर्देयः प्रशान्तये प्रस्थसमितपिष्टेन सम्यक् कृत्वाथ पत्रि
काम् सप्त ध्वजास्सप्त दीपाः स्वस्तिकास्सप्त वै तथा पुष्पाणि मत्स्यमांसं च भक्तं चैवं तुदगा
हरेत् धूपस्तु गोशृङ्गलशुनमित्यादिकैः शान्तिस्नानं ब्राह्मणभोजनं च मन्त्रस्तु क्रीं फट्
स्वाहा अष्टमे दिवसे मासे वर्षे वा क्रमतो शिशुम् विडालिकानामधेया पूतनास्य ततो ज्वरः
गात्रभेदोऽथ हृदितं रोदनं नेत्रमीलितम् जिह्वाशोषः शिरःस्फोटं आहारद्वेष एव च अक्षिरो रा०म०
गो भवेदेतद्दिग्गितं तत्कृहाच्छिशोः तण्डुलप्रस्थपिष्टेन पत्रिकां कारयेत्ततः पायसमेकसर्पि ७३

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

ज्वरः छर्द्दिः श्वासकासो शूलं चेत्येतद्धीरितम् अन्नन्दो बश्चतत्रायं बलिर्देयो विचक्षणैः अस्य प्रमाण
पिष्टेन पुत्रिकां तत्र कल्पयेत् अष्टाङ्गुलेखयेत्तत्र विल्ववृक्षस्य कंटकैः गुडोदनञ्च सर्पिश्च ध्वजा
नाम्पञ्चविंशतिः स्वस्तिकानाम्प्रदीपानाम्पञ्चविंशतिरेवच चत्वारि रक्तपुष्पाणि होत दक्षि
णादिग्गतः संध्यात्रये वक्ष्यमाणमंत्रेणानेन निक्षिपेत् ॐ नमो भगवते वासुदेवाय हन कुं फ
ट् स्वाहा धूपो गोशृंगलशुनमित्यादिकः शांतिस्नानं ब्राह्मणभोजनञ्च पूर्ववत् एकादशे
दिने मासे हायने ष्टतना विका गृह्णाति बालकं पश्चाज्ज्वरस्तस्य प्रजायते अन्नद्वेषो मुखे शोषो
गात्रभंगश्च रोदनम् ऊर्ध्वदृष्टिरपीत्येतल्लक्षणं तज्जहाच्छिशोः पुत्रिकां माषपिष्टेन रचि
ताम्मुक्तमोदनम् पुष्पाण्यपि च श्वेतानि ध्वजानां पञ्चविंशतिः स्वस्तिकानां प्रदीपानां प
चविंशतिरेवच एतत्सर्वं यमाशायां संध्यायां प्रातराहरेत् अथ मन्त्रः ॐ नमो भगवते ना
राय चन्द्रहासवज्रहस्ताय ज्वर दुष्टग्रहाय ॐ फट् स्वाहा धूपस्तु गोशृंगलशुनमित्यादिकः
शांतिस्नानं ब्राह्मणभोजनञ्च द्वादशे दिवसे मासे वर्षे वा पूतना शिशुम् अन्धपूतनाख्या प्र
गृह्णाति ज्वरस्यात्प्रथमन्ततः रोदनं सर्वदा दंतखादनं रक्तनेत्रता रोमाञ्चस्तापकृत्पन्न दक्षि

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

ॐ नमो नारायणाय त्रैलोक्यविद्रावणाय ॐ क्रीं फट् स्वाहा इति द्विः ३

क्षीरलाजाश्च शष्कुली गुग्गुलं मेषमांसञ्च तथा पर्प्पटिका अपि ध्वजादीपाश्च चत्वारो गंधा नानाविधा अपि सुमनासिचरक्तानित्येवमन्त्रोदितो वलिः अमुं समाहरेत् पूर्वसंध्यायां दक्षिणादिशि छद्माष्टम्यां वक्ष्यमाणमन्त्रेणानेन संयुतः ॐ नमो रावणाय त्रैलोक्यद्रावणाय ज्वल २ हन २ ॐ फट् स्वाहा अनेनैव च मंत्रेण पूजादिवलिहरणान्तो कर्म्म कुर्य्यात् धूपस्तु गोशृंग लशुनमित्यादिकः शांतिस्नानं ब्राह्मणभोजनञ्च अत्र छद्माष्टम्यां वलिहरणमिति न नियमः किंतु सति संभवे प्रशस्तं सार्थम् अन्यथा तत्प्रतीक्षायां शिशुविनाशापत्तेः नवमे दिवसे मासे हायने वापि वालकम् गृह्णाति मदना नाम्नी पूतनोतदनंतरम् ज्वरश्छर्द्दिर्घूर्णाध्यानकासश्वासश्चातिदमता गात्रभंगश्च शूलञ्च चिह्नान्येतानि वालके प्रेक्ष्य प्रमार्ग्गे पिष्टेन विनिर्म्माय च पुत्तिकाम् ओदनं मत्स्यमांसं च पर्प्पटी चेक्षुमूलिकाम् निक्षिपेत्पूर्वसंध्यायामुत्तरस्यां वलिं दिशि अथ मंत्रः ॐ नमो भगवते वासुदेवाय छद्ममरणलेवलिमादाय हन २ ॐ फट् स्वाहा धूपस्तु गोशृंग लशुनमित्यादिकः शांतिस्नानं ब्राह्मणभोजनञ्च दशमे दिवसे मासे हायने वाथ वालकम् पूतना रेवती नाम्नी गृह्णीयाद्वालकं ततः

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

लंतस्पलक्षणाम् तण्डुलप्रस्थपिष्टेनकृत्वातत्राथ पुत्रिकाम् त्रयोदश स्वस्तिकाश्च ध्वजादीपा
स्तथैवदश अपूपामत्स्यमांसञ्च तथा पर्प्पटिकाअपि एतत्सर्वन्दक्षिणस्यां दिशि मंत्रेणनि
क्षिपेत् अथमंत्रस्तु ॐनमोभगवतेनारायणायप्रज्वलवज्रहस्ताय हर २ शोषय २ मर्दय २
पातय २ हन २ दुष्टसत्वानांहुंफट् स्वाहा गोमृगमित्यादिकोधूपश्शान्तिस्नानंब्राह्मणभोज
नञ्च पूर्ववत् इतिदेव्युत्पन्नितवालकरक्षणपूतनाविधानम् अथवोधायनोक्ताज्वराद्युत्प
त्तौशान्तयः प्रतिपदिकष्टसन्देहोवादिनान्यष्टादश अग्निर्देवताअग्निरस्मीतिपूजामन्त्रः
हैमीप्रतिमाघृतधूपोघृतदीपश्च यथासम्भवनैवेद्यंघृतहोमद्रव्यंशान्तिर्भवति अत्रसर्व
त्रैतत्तद्देवतामन्त्रजपः सहस्रादिसंख्याकः पश्चात्पूजाहोमदानादिहोमसंख्याचाष्टोत्तरश
तादिर्ब्राह्मणभोजनम्पनकल्पसह स्रंस्मृत्युनिर्दिश्य द्वितीयायादिनानिषोडश ब्रह्मादेवताब्रह्मज
ज्ञानमितिजपपूजाहोममन्त्रः अगरुधूपः घृतदीपः सर्वत्रशर्कराने वेद्यंतिलयवाज्यानि
होमद्रव्यंप्रतिमाचहैमी तृतीयायादिनानिनवपार्वतीदेवतागौरीमिमायेतिमन्त्रः दूर्वा
भिः पूजाकुंकुमधूपः गुग्गुलधूपोवाघृतदीपः द्राक्षाक्षीराज्यंनैवेद्यम् पायसंत्रिमधुरा।

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

घृतदीपः पयो नैवेद्यम् तिलयवाज्यपायसशर्करामधूनि यथायोगं होमद्रव्यम् ५ षष्ठ्यादिनानि द्वादश स्कन्दो देवता
द्रष्टा स्कन्द इति मंत्रः पीतचन्दनं रक्तं वा गन्धः रक्तानि पुष्पाणि जातीपुष्पाणि ५

शां॰म॰ कं दूर्वाश्च होमद्रव्यं प्रतिमा हेमी ३ चतुर्थ्यादिनानि षोडश गणपतिर्देवता गणानान्त्वेति पूजा हे
७५ नादिमंत्रः हेमी प्रतिमा कुंकुमरक्तचन्दनगन्धः करवीरादीनि पुष्पाणि अगरुधूपो लड्डुकादि
क्षुरखण्डानि नैवेद्यं नालिकेरशकलानि इक्षुशकलानि कदलीफलानि च होमद्रव्यम् ४ पञ्च
म्यादिनान्येकविंशति नागदेवता हेमी प्रतिमा नमोस्तु सर्पेभ्य इति मंत्रः चन्दनगन्धः
सुरभिपुष्पाणि वा जटामांसी धूपः लड्डुकादि नैवेद्यम् फलानि वा तिलयवाज्यं होमद्रव्यं
हेमी प्रतिमा शान्तिर्भवति ६ सप्तम्यादिनान्यष्टौ दिननाथो देवता आसत्येनाकृष्णेनेति
वा मंत्रः हेमी ताम्रजा वा प्रतिमा कुंकुमगन्धः करवीरादीनि पुष्पाणि गुग्गुलधूपः शर्करा
घृतसंयुतपायसं नानाफलानि नैवेद्यमर्कसमिधः पायसं होमद्रव्यम् ७ अष्टम्यादिना
नि त्रयोदश ईश्वरो देवता तमीशानमिति पूजादिमन्त्रः राजती प्रतिमा कर्पूरमिश्रितचन्द
नगन्धः बिल्वदलानि अर्घ पुष्पाणि नीलोत्पलानि च पुष्पाणि जटामांसी धूपः पायसं
नानाभक्ष्याश्च नैवेद्यम् त्रिमधुराक्तास्तिल होमद्रव्यं रोगशान्तिर्भवति ८ नवम्यादिना राम॰
न्यष्टादश भगवती दुर्गा देवता जातवेदसे पूजा मंत्रः हेमी प्रतिमा रक्तचन्दनं गन्धः कुंकु ७५

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मार्दिकं वा ९ दशम्यां दिनानि पञ्चविंशतिः यमो देवता हैमी लोही वा प्रतिमा यमाय त्वेति पू
जामन्त्रः चंदनं मृगमदश्च गंधः मधुसर्जुरसश्च धूपः तिलतैलदीपः विल्वपत्राणि कुसुम
तिलाश्च होमद्रव्यम् कृशरान्नं नैवेद्यम् घृततिलमधुतिलमुञ्जा होमद्रव्यम् १० एकाद
श्यां दिनानि सप्तविश्वेदेवा देवता विश्वेदेवास मंत्रः हैमी प्रतिमा श्वेतचन्दनं गन्धः कृष्णा
गरुधूपः घृतदीपः तुलसीपत्राणि पूजायां यवमोदकम् नैवेद्यं तिलयवमध्वाज्यं होमद्रव्यम्
११ द्वादश्यां दिनान्येकादश रुद्रा देवता या ते रुद्रेति मंत्रः हैमी प्रतिमा चंदनं श्रीखण्डमग
रुधूपो घृतदीपः पायसं नैवेद्यम् चम्पकपुष्पं कमलं वा पूजायां तिलयवाज्यव्रीहिमधूनि
होमद्रव्यं शान्तिर्भवति १२ त्रयोदश्यां दिनान्यष्टौ अश्विनौ देवता रौक्मी राजती वा मूर्तिः आ
प्यायस्वेति मंत्रः पूजादौ श्वेतचन्दनं गन्धः चन्दनधूपः घृतदीपः दधिशर्करा नैवेद्यम्
तिलयवास्त्रिमध्वक्ता होमद्रव्यं शान्तिर्भवति १३ चतुर्दश्यां दिनानि द्वाविंशति शम्भुर्देवता नमः
शम्भवायेति मंत्रः रौक्मी राजती वा मूर्तिः श्वेतचन्दनं गन्धः अर्कपुष्पं बिल्वदलानि वा
अगरुधूपः पायसं नैवेद्यम् त्रिमध्वक्तास्तिला होमद्रव्यम् १४ अमाया दिनान्यष्टादश

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां॰ प्र॰ ७६

शचीदेवताहोमायस्वादितिमंत्रः हेमी प्रतिमा कुंकुमादिगंधः नानासुगंधपुष्पाणि कृ
ष्णागरुर्धूपः फेणिकापूलिकादिनैवेद्यम् शर्कराघृतपायसहोमद्रव्यम् ३० पूर्णिमा
यादिनानिषोऽशचंद्रोदेवतादमनेकपूजार्थमन्यत्सर्वंचैत्रयोदशीशांतिवद्बोध्यम् १५
इतितिथिदोषशांतिः अथाश्वलायनोक्तवारशांतिः आदित्यवारस्यरुद्रोदेवता या
तेरुद्रेतिमंत्रः हेमी राजतीवामूर्तिः चंदनगंधः अगरुर्धूपः घृतदीपः पायसहोमद्र
व्यंनैवेद्यञ्च १ सोमवारस्यपार्वतीदेवतागौरीर्मिमायमंत्रः हेमी राजतीवामूर्तिः
कुंकुमगन्धः सुगंधिपुष्पं अगरुर्धूपः घृतदीपः नानाभक्ष्याणिनैवेद्यम् तिलयवा
होमद्रव्यंदेवभक्तसंतर्पणञ्च २ भौमस्यस्कंदोदेवताअस्यैत्सर्वंषष्ठीशांतिवत् ३
बुधवारस्यविष्णुर्देवताविष्णोरराटमसीतिमंत्रः हेमस्वरूपंपीतचन्दनंपीतपुष्पाणि
कमलानिचअगरुर्धूपः यवलड्डुकानैवेद्यम् तिलयवाज्यहोमः ४ गुरुवारस्यब्रह्मा
देवताब्रह्मजज्ञानमितिमंत्रः हेमी प्रतिमा कुंकुमगंधः पर्णपुष्पं गुग्गुलधूपः शर्करा राम
ज्यनैवेद्यम् तिलयवधानाघृतंहोमद्रव्यम् ५ शुक्रवारस्यइंद्रोदेवतात्रातारमिंद्रमितिमंत्रः ७

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

हैमीमूर्त्तिश्चन्दनगंधः चंपकंपुष्पमगरुर्धूपः घृतपक्वंनैवेद्यम् तिलयवाज्यमधूनिहोमद्रव्याणि
६ शनिवारस्ययमोदेवतायमेनदत्तमितिमंत्रः हैमीलोहीवामूर्त्तिः ताम्रजेतिकेचित् चन्दनं
गन्धः चंपकं अगरुर्धूपः पुष्पंकृष्णंमधूधूपः तिलतैलदीपः मधुमत्स्याश्चनैवेद्यम् तिलम
धुचहोमद्रव्यंशांतिर्भवति ७ शनिवारशांतिः अथनक्षत्रशान्तयः वृद्धवशिष्ठः रोगशांतिं
प्रवक्ष्यामिरोगार्त्तानांशरीरिणाम् बलिपूजांगहोमैश्चजपब्राह्मणभोजनैः १ यस्मिन्धिष्ण्ये
यदानॄणांरोगःसंजायतेतदा तद्धिष्ण्यपूजाकर्त्तव्यातत्तदीश्वरतुष्टये २ सुवर्णेनतदर्द्धेनतद
र्द्धार्द्धेनवापुनः धिष्ण्येशप्रतिमाकल्यायथावित्तानुसारतः ३ ईशान्यामथवाप्राच्यामुदीच्यां
दिशिसंलिखेत् तण्डुलोपरिपृष्ठदलेपद्मंगोमयमण्डले ४ पञ्चामृतैस्सलेपैश्चतत्तन्मंत्रैः
पृथक्पृथक् स्नाप्यकल्योक्तमंत्रेणप्रतिमांस्थापयेत्पुनः ५ कर्णिकायान्तुसंस्थाप्यध्यात्वा
देवंसमर्च्चयेत् तद्वर्णवस्त्रगन्धाद्यैःरक्तधूपोपहारकैः ६ आरक्तवर्णंकुंभंचपञ्चत्वक्पल्ल
वैर्युतम् मुक्तवस्त्रस्वर्णरत्नसर्वौषधिसमन्वितम् ७ मृत्पञ्चगव्यसद्बीजफलदक्षोदकुशा
न्वितम् देवस्यपूर्वतःस्थाप्यजलमंत्रेस्समर्च्चयेत् ८ प्रतीच्यांस्थण्डिलेवह्निंविधिवत्स्थाप

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां॰ मं॰ येत्ततः मुखांते जुहुयाद्घृतद्रव्येण वसुसहस्रकम् ९ तिलहोमं व्याहृतिभिरष्टोत्तरसहस्रकम् पू-
७७ र्णाहुतिञ्च जुहुयात्सम्यक्सम्यग्जपादिकम् १० ततः सुखोपविष्टस्य रोगिणः प्राङ्मुखस्य
च मंत्रपूतेन कुंभजलेन लिंगैर्वारि मंत्रकैः ११ मार्जनं कारयेत्तस्य सम्यक्संकल्पपूर्वकम
नीराजनञ्च शुद्धात्मा पूजास्थानं समागतः १२ दैवज्ञतोशनं भक्त्या प्रणम्य प्रार्थयेदि-
ति अमृतोऽन्नवधिश्चैव यतस्त्वाशोकरात्मकः १३ रोगादस्माच्च मां रक्ष तव वश्याश्च पि-
याः इति प्रार्थ्य ततो दद्यात्प्रतिमां वस्त्रसंयुताम् १४ दक्षिणासहितां भक्त्या आचार्याय
कुटुंबिने ब्राह्मणाय च यथाशक्त्या ब्राह्मणान्भोजयेत्ततः १५ कृत्वा नक्षत्रपूजां तु तिथि-
वारर्क्षयोरपि सर्वान्कामानवाप्नोति रोगी रोगात्प्रमुच्यते १६ अश्विन्यामुत्थितो व्याधि-
र्नवरात्रेण मुच्यति दैवस्यात्वेति मंत्रस्य गायत्री कवयोश्विनौ १७ श्वेतवर्णायुधाभरणांकु-
भांभोजधरौ पृथक् चंदनोत्पलपुष्पाज्यगुग्गुलो नु गुडप्रियौ १८ क्षीरलड्डुकभक्तारौ समि-
धः क्षीरवृक्षजाः गुडौदनबलिं दद्याद्दीपं सार्द्धनिशामुखे १९ भरण्यामुत्थितो व्याधिर एमः
विरात्रिधनप्रदः मासेन मुच्यतेत्यथवा देवस्य कुटिला गतिः २० त्र्यंबकस्य च मंत्रेण प्राक्तो ७७

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

स्कंदर्षिर्देवता: गंधोगरुश्च करवीरपुष्पं धूपश्च गुग्गुलु: २१ अष्टदीपश्च सर्वेषां नैवेद्यश्च गुडौ
दनम् पाशदंडधरो रक्तस्त्वाज्यमध्वाक्षतैर्हविः २२ महिषीनायकीरूढः कृशरान्नवलिं ह
रेत् वक्ष्यमाणेन मंत्रेण वलिं सम्यक्प्रदापयेत् २३ कृत्तिकोत्थया चया व्याधिर्द्दशरात्रेण मुञ्च
ति स्रुक्स्रुवाभयवरदः स्ववर्णो मेषवाहनः २४ मेधातिथिर्ज्जगत्पयश्री पुन्नतु माँ देवेति च चं
दनं यूथिवापुष्पं च घृतदीपः सगुग्गुलुः २५ नैवेद्यं तिलमाषान्नवरकान्नेन संयुतम् गुडौ
दनं हविस्तत्र पायसेन वलिं हरेत् २६ रोहिण्यामुत्थितो व्याधिर्द्दशरात्रेण मुञ्चति नमो
ब्रह्मणे मंत्रस्य गायत्री विधिरीश्वरः २७ स्रुक्कुंकमण्डलुस्तत्र अक्षसूत्राभयप्रदः
चन्दनं कमलं पुष्पं सदशांगं च गुग्गुलम् २८ नैवेद्यं पायसं साज्यं सर्वदा तेर्हविर्भवेत् दधि
क्षीरघृतक्षौद्रशाल्यन्नेन वलिं हरेत् २९ चन्द्रभे शोत्थितो व्याधिः पञ्चरात्रेण मुञ्चति वर
दोवरदपाणिश्च श्वेतो सोरथवाहनः ३० नघानवाभयत्वस्य गायत्री गौतमः शशी चन्द
नं कुमुदपुष्पं दशांगं पायसौदनम् ३१ नैवेद्यं मण्डकापूपघृतक्षौद्रसमन्वितम् शर्क
रादधि मिश्रेणाज्यस्कान्नेन वलिं हरेत् ३२ आर्द्रायामुत्थितो व्याधिरचिरान्निधनप्रदः

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

पुष्ये २

शां॰मे॰ मासेन मुञ्चत्यथवा देवस्य कुटिला गतिः ३३ शुद्धस्फटिकसंकाशः शूलखड्गाभयेष्टदः
७८ नमः शंकरायेत्यस्य बृहती शो विधिर्ऋषिः ३४ चन्दनं सौरभं पुष्पं सवर्त्ति काञ्चयम धूपो २
मलयजं पिष्टं घृतान्नपीतवर्णकम् ३५ घृतान्नं नरागुलहविः पीतान्नेन बलिं हरेत् ०
४ दृशांशम्याय सोदनम् समध्वाम्भं हविस्तत्र दध्योदनबलिं हरेत् पुनर्वसौ भवेद्व्याधिर्न्नवरात्रे
ण मुञ्चति कमण्डल्वक्षसूत्रे धृग्दर्भासिक्स्रुवभृत्सदा अदितिर्योगे मन्त्रस्य त्रिष्टुभो दुहि
रोऽदितिः हरिद्राकुङ्कुमं गन्धं पुष्पं २ त्रुटिः

३९ पुष्ये समुत्थितो व्याधिः सप्तरात्रेण मुञ्चति
पीतोदराण्डकमण्डल्वक्षसूत्राभयवरोधनः ४० बृहस्पते परि स्यात्रिष्टुप् जीवाङ्गिरा ऋषिः
कुङ्कुमं वारिजं पुष्पं नैवेद्यं घृतपायसम् ४१ मण्डकागुडसंयुक्तमेतद्देवहविर्भवेत् समण्ड
कं घृतान्नेन बलिं तत्र प्रदापयेत् ४२ श्लेषायामुत्थितो व्याधिः क्लेशान्मासेन मुञ्चति नमो रामः
श्रस्त्विति मंत्रस्य विराडग्निश्च सर्पराट् ४३ मधुवर्णो भोगयुक्तः खड्गचर्म्मधरो शुभः ७८

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

सकुंकुमागरुर्गंधः पुष्पञ्चागस्तिसंभवम् ४४ घृतगुग्गुलधूपोत्रनैवेद्यंक्षीरसर्प्पिषा ह
विस्साज्यसंयुक्तंदध्योदनवलिंहरेत् ४५ मघायांचोत्थितोव्याधिरचिरान्निधनप्रदः
अथवासार्द्धमासेनधूम्राद्दंडपवित्रधूर्के ४६ आयन्तुनस्त्विति वास्यजगतीपितरोथवा
चंपकंचंदनंपुष्पंधूपःसघृतगुग्गुलः ४७ नैवेद्यंघृतपिष्टान्नंतिलाज्यंसघृतंहविः
सतिलान्नंचमुज्ञान्नंवलिंस्वापिहृत्तत्तये ४८ पूर्वाफाल्गुणिभेव्याधिरर्द्धमासेनमुञ्चति
भगएवभगवानित्यस्यानुष्टुभोविधिः ४९ पद्माभयकरःपद्मवर्णःसिंहासनोस्थितः
चन्दनेमालतीपुष्पंविल्वदीपोघृतोदनम् ५० नैवेद्यंशर्करापूपलड्डुकाभिश्चसंयुतः
घृतोदनंहविस्तत्रपायसेनवलिंहरेत् ५१ अर्य्यमर्क्षेभवेद्व्याधिरर्द्धमासेनमुञ्चति प
द्मवर्णःपद्मसंस्थःपद्मगर्भसमद्युतिः ५२ अर्य्यमायातिमन्त्रस्यअर्य्यमात्रिष्टुवङ्ग
नः कर्पूरंकुंकुमंगंधंपुष्पंधूपकंसज्जितम् ५३ घृतगुग्गुलधूपोत्रनैवेद्यंघृतपायस
म् होमद्रव्यंघृतान्नंस्याच्छल्यन्नेनवलिंहरेत् ५४ हस्तेसमुत्थितोव्याधिर्न्नवरात्रेण
मुञ्चति उद्गुत्यमितिहिरण्यस्तुगायायत्र्यपदितीजयेत् ५५ रक्तंगन्धंकुंकुमञ्चपुष्पराजी
वसंज्ञिकम् सुगन्धगुग्गुलुर्धूपोनैवेद्यंघृतपायसम् ५६ मधुपुष्पातिलाज्यान्नंदूर्वाभिः

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शां॰म॰ सहितं हविः गुडशर्करमध्वाज्यपिष्टान्नेन वलिं हरेत् ५७ चित्रायामुत्थितो व्याधिर्द्दशरात्रेण मुञ्च
७९ ति चित्रं देवानामित्यत्र यज्ञ्वनुष्टुप् पितामहः ५८ अक्षसूत्राभयकरश्चित्रवर्णः शिवे रतः सकुंकु
मागरुर्गन्धः कुमुदं चित्रवर्णकम् ५९ नैवेद्यं मोदकान्पाज्यं चित्रान्नं सह्यं तं हविः तदन्नेन वलिं
दद्यात्सर्वरोगापनुत्तये ६० स्वात्यर्क्षे चोत्थितो व्याधिः सर्वदा निधनप्रदः एकद्वित्रिचतुःपञ्च
मासैर्वापि समुच्यति ६१ सनःपितेति मंत्रस्य गायत्री मरुद्गिराः खड्गचर्म्मधरो कृष्णो गन्धः
कृष्णागरुर्हृदयाम् ६२ पुष्पं मदनकं धूपं चन्दनागरुगुग्गुलः नैवेद्यं पायसं साज्यं हविस्तेन व
लिं हरेत् ६३ द्विदैवते भवेद्व्याधिर्म्मासेनैकेन मुच्यति इन्द्राग्नी आगतमिति गायत्री वास्य चै
वहि ६४ मधुश्छन्दः बीन्द्राग्नी तयोर्ध्यानं च पूर्ववत् श्रीखण्डकुंकुमं गन्धं तयोः पुष्पं स
रोरुहम् ६५ देवदारुस्तयोर्धूपो नैवेद्यं घृतपायसम् तदेवान्नं हविस्तत्र चित्रान्नेन वलिं हरेत्
६६ मित्रर्क्षे चोत्थितो व्याधिर्द्दशरात्रेण मुच्यति मित्रस्य चर्षणीरिति गायत्री चास्य चैव हि
६७ ऋषिर्हिरण्यस्तूपाख्यस्तत्र मित्रोऽधिदेवता द्विभुजोपि पद्मगर्भाभिः पद्मभृत्पद्मसंस्थितः
६८ कुंकुमं पुण्डरीकाख्यं पुष्पं धूपं च चन्दनम् नैवेद्यं पायसं साज्यं हविः कन्दं च मूरणम् राम॰
६९ वलिस्तत्र प्रदातव्यो मधुशर्करपायसम् घृतपूरकमाषान्नं मुण्डान्नं च समर्पितम् ७० ७९

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

ज्येष्ठायामुत्थितो व्याधिर्मृत्युरेव न संशयः अथवा मासमेकं वा मुञ्चन्त्येव न संशयः ७१ इन्द्रस्त्व
इति मंत्रस्य गायत्री द्रोणगिरा क्रमणिः इन्द्राय पूर्ववक्त्र गन्धं चन्दनकुङ्कुमं शुभम् ७२ कर्पूरं धूपानेव
द्यं चित्रान्नं सुमनोहरम् हविस्तु सूरणं कन्दं मधुकं दुग्धपायसम् ७३ विचित्रपुष्पगन्धं च दध्य
न्नेन बलिं हरेत् मूलभे चोत्थितो व्याधिर्मासार्द्धेन विमुञ्चति ७४ खड्गचर्मधरः कृष्णः क
रालवदनः प्रभुः मोक्षरोगस्य गायत्री घोरः करवाथ नैर्ऋतिः ७५ गंधः कृष्णागरुः पुष्प
पद्मनीलोत्पलं शुभम् धूपः कृष्णागरुर्मांस मिश्रान्नमुपहारकम् ७६ तदेवान्नं हविस्तत्र
माषान्नेन बलिं हरेत् वारिभे चोत्थितो व्याधी रोगिरोगो निधनप्रदः ७७ विमुञ्चत्यथवा
मासैर्द्विषट्नवचसप्तभिः आप्यायस्वेति मन्त्रस्य गायत्री पद्मजो जलम् ७८ सुवर्णादि
भुजः पद्मपाणिर्गन्धस्तु चन्दनम् पद्मं तैलाप धूपोत्र नैवेद्यं घृतपायसम् ७९ हवि
र्मूलसूरपिष्टान्नं तदन्नेन बलिं हरेत् विश्वभे चोत्थितो व्याधिः सार्द्धमासेन मुञ्चति ८०
विश्वेदेवास इत्यस्य गायत्री विश्वदेवता कमराङ्ल्वभया भोजवरदश्चकुशासनः ८१
चन्दनं कमलं पुष्पं धूपं सघृतगुग्गुलः नैवेद्यं पायसाज्यान्तं हरिरव्येन देवा हि ८२ समि

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

द्भिर्न्निचुलेस्माईनादन्नेनवलिंहरेत् आवरुणोचोत्थितोव्याधिर्द्दशरात्रेणमुञ्चति ८३
अतोदेवेतिमन्त्रस्यगायत्रीपद्मजोहरिः पीतांवरःकृष्णवर्णः शंखचक्रगदाम्बुजः ८४
चन्दनमालतीपुष्पंधूपंकर्पूरगुग्गुलुः शाल्यन्नंषट्रसोपेतंभक्ष्यभोज्यादिभिःसह ८५
नैवेद्यंहविरश्वत्थपायसेनवलिंहरेत् वसुभेचोत्थितोव्याधिर्द्दशरात्रेणमुञ्चति ८६ आ
यंतामिहमन्त्रस्यानुष्टुप्व्यासोवसुस्ततः चापवाणधरःसुश्लोगंधःकर्पूरचन्दनम् ८७
वारिजंगुग्गुलुर्धूपोनैवेद्यंघृतपायसम् हविश्चोदकरसमिक्षुपायससंयुतम् ८८
लड्डुकापूपमध्वाज्यतिलपिष्टवलिंहरेत् वारुणेचोत्थितोव्याधिरष्टरात्रेणमुञ्चति
८९ इमंमेवरुणइत्यस्यगायत्रीकण्ववारयः नागपाशधरःश्रीमान्वररत्नविभूषि
तः ९० मकरस्थोगुरुर्गन्धःपुष्पंचकमलोत्पलम् कर्पूरचंदनंधूपोनैवेद्यंघृतपूलि
का ९१ हविरश्वत्थसमिधाचित्रान्नेनवलिंहरेत् अजपाद्भेभवेद्व्याधिःसर्वदानिधन
प्रदः ९२ अथवावज्रभिर्म्मासैर्द्दिवसैर्वापिमुञ्चति वामपादकरंभूम्यामाकाशन्त्वप
रद्वयम् ९३ प्रसार्यप्राञ्जलिःसाक्षादीश्वरंचिन्तयेस्थितः शमग्निरित्यस्याजपाजायत्री
चतुराननः ९४ कुंकुमंचन्दनंगंधंपुष्पंश्वेतार्कसंभवम् धूपःशतौषधीमिश्रानैवेद्यं

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

भौमार्द्रापञ्चमीनां बुधोत्तराषाढतृतीयानां गुरुशतभिषषष्ठीनां शुक्राश्विन्यष्टमीनाम् ६

दधिपायसम् ९५ हविष्कूष्माण्डखण्डस्याद्दध्यन्नेन बलिं हरेत् अहिर्बुध्न्ये भवेद्व्याधिरष्ट
मासेन मुञ्चति ९६ नमस्ते रुद्र इत्यस्य सर्वं तत्रैव संस्थितम् गन्धचन्दनकर्पूरैः पुष्पपद्मो
त्पलशुभम् ९७ विल्वगुग्गुलधूपञ्च नैवेद्यं घृतपायसम् मुद्गमाषतिलानाज्ययववी
हिमयं हविः ९८ रेवत्यामुत्थितो व्याधिर्युग्ममासेन मुञ्चति पूषा च देवता भोजनं रोगिभो
ज्यधरः शुभः ९९ रक्तचन्दनगन्धाश्च पुष्पं मन्दारसन्निभम् धूपस्तु गुग्गुलः साज्यो नैवेद्यं
घृतपायसम् १०० हविस्तद्देवसंजलं दध्यन्नेन बलिं हरेत् भूतप्रानुगतायस्माद्रोगना
शमहाज्वरः १०१ रोगादस्माच्च मां त्राहि त्वं गृहीतोत्तमबलिम् जन्मसंपद्विपन्नक्षत्रराशिल
५६ ग्नषुयमघुराटके १०२ विपत्प्रत्यरिनैधनतारके अष्टमचन्द्रे च रोगोत्पत्तौ मृत्युः रविमघ्वा ५७
दृष्टौ नाशः निष्पूर्वाषाढनवमीनां चयोगमृत्युः भरणानुराधा वा चेद्द्वा
आर्द्रोत्तराषाढा वा सोमे मघाशतभिषक् वा भौमे अश्विनीविशाखा वा बुधे ज्येष्ठामृग
शिरश्चित्रा वा गुरौ श्रवणाश्लेषा वा भृगौ पूर्वाभाद्रपदाहस्ता वा शनौ चेन्मृत्युयोगः अ
तोऽत्रोक्तास्तिथिवारर्क्षशान्तयो विस्तृताः कार्याः अथ तिथिवारर्क्षप्रसाधारणप्रयोगः
मासपक्षाद्युल्लिख्य मम मोत्पन्नस्य व्याधेर्जीवच्छरीराविरोधेन समूलनाशार्थममुकन
नांसोमविशाखैकादशी ५

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

तत्रामुकदेवतामंत्रस्य जपं कारयिष्ये इति संकल्पः अष्टसहस्रायुतान्यतमसंख्यया वक्ष्यमाणतत्तद्दे
वतामन्त्रस्य जपं कृत्वा कारयित्वा वा मासपक्षाद्युत्पन्नस्य व्याधेर्जीर्णगरोगश्च पूजाचार्य्यवरणं
तत्कृत्वाचार्य्यं पूजयेत् ततश्चाचार्य्यो भूमौ तण्डुलैश्चतुरस्रमण्डलं कृत्वा तत्र हेमीं [illegible] तन्नक्षत्रदे
वतां वस्त्रद्वयपरिवृतां वक्ष्यमाणतत्तद्गंधधूपादिभिः पूजयेत् तदीशान्यां धान्यकुंभं संस्थाप्य
जलेनापूर्य्य गंधसर्वौषधिदूर्वापल्लवपञ्चत्वक्सप्तमृत्फलपुष्परत्नपञ्चगव्यहिरण्यानि तत्त
न्मंत्रैः क्षिप्त्वा वस्त्रद्वयेनावेष्ट्य सर्वे समुद्रा इति तत्र तीर्थान्यावाह्य तत्त्वायामीति तत्र वरुणमा
वाह्य संपूज्याग्निं ग्रहांश्च प्रतिष्ठाप्याज्यभागांते तत्तन्नक्षत्रदेवतामन्त्रेण तत्तद्द्रव्येण चाष्टोत्त
रशताष्टाविंशत्यन्यतरसंख्यया होमं कृत्वा शान्तिकलशेन यजमानमभिषेको विहितेतां प्र
तिमां रोगी ब्राह्मणाय दद्यात् उक्तगन्धाभावे च चन्दनं पुष्पाभावे शतपत्रम् धूपाभावे गु
ग्गुलुः नैवेद्याभावे घृतौदनम् होमद्रव्याभावे तिलाः मंत्राविज्ञाने गायत्र्याष्टोत्तरसहस्र
म् मृत्युनिर्देशाष्टोत्तरशतमन्यद्वा जुहुयात् ततः कुशोदकैर्वरुणसूक्तैः पुराणमंत्रैश्चाभि
षेकं कुर्यात् पूर्णाहुतिं वसोर्धारां च हुत्वा शांतिपाठं च कृत्वाशिषं दद्यात् अतस्सर्व
शांतिर्भवति. ततश्चाचार्य्याय प्रतिमां वस्त्रयुग्मेन वेष्टितां सवत्सां गां सालंकारां दद्यात् इतरे
भ्योऽपि दक्षिणां दद्यात् ब्राह्मणान् भोजयेत् इति रोगोत्पत्तिशांतिप्रयोगः मदनरत्नेऽत्रिस्तु नक्षे

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

७गंधमाल्यानिबलौ ७

त्रयांतिषु गायस्त्रायमोहुत्रोनहोमोष्टोत्तरशतसंख्योवलिश्चतत्तन्नक्षत्रदेवतायेसोपिहोमा
वशिष्टद्रव्येणक्वचिदन्नेन तच्चतत्रतत्रवक्ष्यते अत्ररोहिणीपुष्य श्लेषापूर्वाहस्तस्वातिवि
शाखानुराधाज्येष्ठामूलोत्तराषाढापूर्वाभाद्रपदोत्तराभाद्रपदासूचितमेवहोमद्रव्यम् अ
नुराधासुवलिरपितेनैवान्यत्रतुहोमेवलौ चविशेषस्तत्रतत्रवक्ष्यते द्रव्येतुविशेषोऽश्विन्या
दिक्रमेणदुग्धोक्ता: क्षीरवृक्षसमिधोहोमेदध्योदनंबलौ १० गंधपुष्पाणिवलौ ११ तिलमा
षा: १२ गंधपुष्पंचवलौ १३ जलयुतन्नंहोमे १४ सघृताभुक्तावलौ १५ गन्धपुष्पाणिवलौ
१६ दुग्धाक्तानि गन्धमाल्यानिवलौ १७ पायसंवलौ १८ शालयोहोमेपायसंवलौ १९ हो
मेपायसंवलौच २० बीजाक्षताहोमेगंधपुष्पाणिवलौ २२ अश्वत्थसमिधाहोमेघृताक्ते
मुक्तावलौ २३ जलपुष्पाणिहोमेपायसंवलौ २४ गन्धमाल्योदनंबलौ २५ गंधपुष्पाणि
वलौ २६ घृताक्तामलाहोमेगंधपुष्पाणिवलौ २७ अथयज्जन्मनक्षत्रेयुञ्चराद्युत्पत्ताविष्टा
निष्टकाल स्तत्राश्विन्यादिषुपञ्चविंशति: २५ एकविंशति: २१ एकविंशति: २१ नव
दश १० नक्षत्रं मृत्यु: १ विंशति: २० एकविंशति: २१ विकल्पतोमासोब्दोसप्तविंशति: २७
सप्त ७ अष्टौ ८ अष्टाविंशति: २८ एकविंशति: २१ विंशति: २० विंशति: २० पञ्चविंशति: २५

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

विकल्पत: पक्षत्रयोदशदिनमासा: द्वादश १२ दश १० अष्टाविंशति: २८ दिनातिक्रमात्
योग अनेषु रवेश्लेषा मघा पूर्वा पूर्वाभाद्रपदासु पक्षे मृत्युरपि संभाव्यते इति रोगशांति:
अथ ग्रहणशांतिर्मत्स्यपुराणे होरायां अस्यते यस्य नक्षत्रे वा निशाकर: प्राणसंदेह
माप्नोति स वा मरणमृच्छति १ यस्यात्र जन्मनक्षत्रे ग्रस्येते शशिभास्करौ तज्ज्ञानानो
भवेत्पीडा ये जना श्शांतिवर्जिता: २ यस्य राशिं समासाद्य भवेद्ग्रहणसंभव: तस्य स्ना
नं प्रवक्ष्यामि मंत्रौषधिसमन्वितम् ३ चंद्रोपरागे संप्राप्ते कृत्वा ब्राह्मणवाचनम् संपू
ज्य चतुरो विप्रान् शुक्लमाल्यानुलेपनै: ४ पूर्वमेवोपरागस्य समानीयौषधादिकम् स्था
पयेच्चतुर: कुंभानग्रज: सागराणीच ५ गजाश्वरथ्यावल्मीकसंगमाहृद गोकुला
त् राजद्वारप्रदेशाच्च मृदमानीय निक्षिपेत् ६ पञ्चगव्यं पञ्चरत्नं पञ्चत्वक् पंचपल्लव
म् रोमकं पद्मकं शंखं कुंकुमं रक्तचन्दनम् ७ शुद्धस्फटिकतोयं तीर्थांबु सितं शार्षप गुग्गु
